ख०॥ श्रीवेदव्यासायनमः ।श्रीगुरुभ्योनमः। हरिः ॐ ।लक्ष्मीनारायणौ वंदे व्यासमध्वजयादिकान् ।गुरून्मूलादिपरमान् वंदे विद्यागुरूंस्तथा ॥१॥ श्रीलादि ख०॥
नरसिंहार्यशिष्यः शेषाभिधो बुधः ।प्रवृत्तिमध्वविजयमदेयकृत्तये स्फुटं ॥२॥ अथ ग्रंथस्य परामेत्ति। यथादेवे तथा गुरौ। तस्यैते कथिताह्यर्थाः प्रकाशं
ते महात्मन इत्युक्तेः हरिवन्निवृत्तगुरुभक्तेरपि पुरुषार्थसाधनत्वेन संपाद्यत्वानुवाये श्च महागुरुत्वानुत्तमामत्युत्सादनार्थं विद्यापवतारश्रुत्ते हनुमद्भी
ममध्वानामहात्म्यप्रतिपादकं प्राविविस्तितत्नयाचित्रसन्निहितं काव्यमारभमाणः श्रीमन्नारायणपंडिताचार्यः शिष्टाचारपरंपराप्राप्तं निर्विघ्नेन परि
समाप्त्यादिप्रयोजनहेतुं स्वेष्टदेवताप्रणामं विधाय सज्जनशिक्षार्थमादौ निबध्नाति। कांतायेति। कांताय मनोहराय कोन्वस्य कमनेनेम्येक मनीयेम
नोहरमित्यमरः ।कल्याणगुणैकधाम्ने ।कल्याणाः मंगलरूपाः ।कल्याणं मंगलं शुभमित्यमरः ।गुणाः ज्ञानानंदादयः ।कल्याणाश्च ते गुणा
श्रीराम ॥१॥ श्च ते गुणाश्च कल्याणगुणा कल्याणगुणैकधाम्ने ।कल्याणाः मंगलरूपाः ।कल्याणं मंगलं शुभमित्यमरः ।गुणाः श्च कल्याणगुणाः तेषामेकं मुख्यं धाम आश्रयः
यस्य कल्याणगुणैकधाम्ने एकमेव नं धाम देहोऽयस्य स तथोक्तः तस्मै एके मुख्यान्यकेवलाइत्यमरः ॥धाम देहे गृहे रश्मौ चित्तिचित्स्वः ।नवद्युनाथप्रतिमप्र
भाय ।नवः नूतनः ।नवीनो नूतनो नव इत्यमरः ।उद्यन्नित्ययाबहुः ।नवश्चासौ द्युनाथश्च सूर्यश्च तस्य प्रतिमा सदृशी प्रभा दीप्तिर्यस्य स तथोक्तः तस्मै
अखिलकारणाय ।अखिलस्य समस्तजगतः निमित्तकारणाय ।श्रीप्राणनाथाय ।श्रीलक्ष्मीः ।कमलाश्रीहरिप्रियेत्यमरः ।प्राणः मुख्यवायुः तयो श्रीराम ॥१॥
नाथाय स्वामिने ।यद्वा श्रियः लक्ष्म्याः प्राणनाथाय वल्लभाय नारायणाय विष्णवे नमः नमस्करोमीत्यन्वयः ।उवृत्तकस्येदं द्विहृतोलेहूपरस्मैपदं
करोमि कुर्वः कुर्मः इति रूपं वृत्तं तु उपजातिः स्यादिंद्रवज्रा यदि तौ जगौ गः उपेंद्रवज्रा जतजास्ततो गौ इतींद्रवज्रोपेंद्रवज्रा ।योरस्मिन्नुभ्यके
समावेशादन्तरादीरितेलक्ष्मभाजौ पादौ यदीयावुपजाति। उपजातिरिति तल्लक्षणात् अस्मिन्सर्गेप्राय उपजातिवृत्तं ॥१॥ इदानीं वेदव्यासश्रीकृष्णौ एके
वाक्यप्रणमति तस्मै श्रीकृष्णाय श्रीवेदव्यासायनम इत्यन्वयः ।वाच्यवन्नेवकेकृष्णामवेकृष्णोर्जुनेहरौ ।व्यासकोकिलयोर्ध्वांक्षे कृष्णामा
श्चन्नेहयेरितिविश्वः ।कथंभूताय ।नीरदनीलभासे ।नीरं जलं नीरक्षीरं बुधैं बदमित्यमरः तत्तु ददातीति नीरदो मेघः नारदजानूनीलास्याः
सा भा दीप्तिर्यस्य सः नीरदनीलभाः तस्मै ।भाग्निरुचिशेहोमयइत्यमरः ।पुनः कथंभूताय कृष्णाय ।कृष्णारमणप्रियाय ।कृष्णायाः द्रौपद्याः ।

२०॥

कृष्णा। कृष्णा द्रौपदी नीलाहारकृतासु कृष्णयेति विश्वः। रमयाः प्रहरिः घर्मादयः पांडुपुत्राः तेषां प्रियाय प्रीतिविषयाय तस्मै स्वपालितयेन वेदव्या
सेन पालितं तस्मै रक्षितं निगमं आनादिनिगमं अपौरुषेयमिति यावत् गोकुलं वाचां कुलं समूहः वेद इति यावत् जना कुले यथा सम्बरक्षितं निगमं अना
दिनिगमं अपौरुषेयमिति यावत् गोकुलं विलसा आविलः कलुषः न भवतीति अनाविलः अकलुषो न घनाविलः इह भ्रमरः स्वघर इति यावत् आमस्वन
पंपस्य तत्त्वबोधं तादृशं सतु उल्ललास कुसुमे तस्मै कृष्णायेति संबंधः लसनिलास इत्तो लिट् परस्मैपदं ललास ल्लेसतुः लेसतुः इति रूपं॥

श्रीवेदव्यासाय नमः॥ श्रीनाथकल्याणगुणैकधाम्ने न वघुनाथप्रतिमप्रभाय॥ नारायणायाखिलकारणाय श्रीप्राणना
थाय नमस्करोमि॥१॥ जना कुलं गोकुलमुल्ललास यत्पालितं निगमं अनाविलास्म॥ तस्मै नमो नीरदनीलभासे कृष्णाय कृ
ष्णारमणप्रियाय॥२॥

कृष्णपक्षे तु तस्मै कृष्णाय वसुदेवपुत्राय नमः इति योजना। कथंभूताय नीरदनीलभासे कृष्णाय कृष्णारमणप्रियायेति इदं विशेषणद्वयं पूर्ववद्व्या
ख्येयं। तस्मै कस्मै यत्पालितं येन कृष्णेन पालितं रक्षितं गोकुलं गावो धेनूनां कुलं समूहः यूथं गोर्नर्क वृषभेन्द्रो वा इत्युपेतं पुरुषस्त्रियामिति लत्व
माला गोकुलं नंदादिगोपालावासस्थानं च। निगम जनस्थं निगमानवरतानस्थं मध्यथा शुभो मरंदं इह भ्रमरः ना शोभित मिहत्यर्थः अनाविलं निर्मलं
आत्मास्वनाबोधस्य तत्त्वबोधं सतु उल्ललास विभौ॥२॥ इदानीं मध्वाचार्यकीर्तिवर्णनेन स्वस्य निर्मलज्ञानं प्रार्थयते अपि तीति मध्वस्यानंदती
र्थस्य मध्व आनंदतीर्थस्याद्दिमुखेः। कीर्तिर्दिवानं अस्माकं विशदां निर्मलां दृशं ज्ञानदृष्टिं दृष्टिज्ञानं ज्ञानं ज्ञानदृष्टिविषय भ्रमरः। दिश्यात् दिशतु दिश
अतिसर्जने इह लृ नः आशीर्लिङि परस्मैपदं दिश्यात् दिश्यास्तां दिश्यासुः इति। कथंभूता कीर्तिः दिननाथदीपिं दिननाथस्य दिनानां दिवसानां नाथस्य

ये

अधिपः सूर्यः। दिनानामधिपः सूर्य इति वा तत्तस्य दीप्तिं प्रभां जयंती निरस्यंती तदपेक्षया अतिशमितेति यावत्। अतिशयमेवोपपादयति।
त्रिलोक्या इति। त्रिलोक्याः त्रयाणां लोकानां भुवनानां समाहारस्त्रिलोकी तस्याः इयं पंचमी विभक्तिः बहिरपि उल्लसंती प्रकाशमाना। मुहुः पुनः
अंतरं अंतर्विद्यमानं तमः अज्ञानं हरंती। दिननाथदीप्तिस्तु त्रिलोक्याः बहिर्न शोभते किंतु त्रिलोक्यंतर एव तामसानामप्यंतरं तमो हरति। किंतु बाह्यमेव
तमः अंधकारं परिहरति अतः मध्वकीर्तिर्दिननाथदीप्त्यपेक्षया अतिशयितेति भावः। इदानीं स्वपितॄन् प्रणमति तमहमिति अहं तान् गुरून्
पितॄन् गुरून् निषेकादिकरे पित्रादौ गुरुरयं त्रिषु इति विश्वः। त्रिविक्रमार्यान् त्रिविक्रमाख्यान् तत आर्यपंडितान् तानुपगतानिति ध्यानेन ह

श्रीराम ॥२॥

अपि त्रिलोक्या बहिरुल्लसंती तमो हरंती मुहुरंतरस्य। दिश्यात्सदा नो विशदं जयंती मध्वस्य कीर्तिर्दिननाथदीप्तिं ॥१॥ तमोनु
दानंदमयाम्बुलोकरुहप्रदीपाकृतिगोगणेन। पदास्यसीतांशुभुवा गुरूंस्तान् त्रिविक्रमार्यान् प्रणमामि वर्यान् ॥२॥ छ॥ छ॥

श्रीराम ॥२॥

लोपश्चादिकांतरिपस्य सूपे आर्यद्विति नृपेतत्स्मरगस्यर्धानां ज्ञानार्थं वा आर्यपंडिता इति व्याख्याता। प्रणमामि प्रकर्षेण भक्त्यादिति शयेन न
मामि। नमस्कारोमि णमप्रह्वत्वे शब्दे चेह तोल्फु परस्मैपदं नमामि नमावः नमामः। कथंभूतान् गुरून् वर्यान् उत्तमान्। लोकः जनः लोक
स्तु भुवने जने इत्यमरः। तमोनुदानाम् अज्ञानं नुदति नाशयतीति तमोनुत् तेनापदास्यसीतांशुभुवा एषां श्री गुरुभ्यो नमः ॥छ॥ छ

 त्रिविक्रमपंडिताचार्याणां आस्यवक्त्रे वक्त्रास्येवदनं तुंडमाननं लपनं मुखमित्यमरः निदेवसीतीतनुः शीतलः अन्नावरकिरयाः स्यस्य सन्दीलारंभुद्र।
विरयोस्त्री मयूखांशुरित्यमरः सीतं शोभनं वाङ्मन्नेन नेत्रप्रदीपाकृतिगोगणेन नेत्रप्रदीपाख्याचसआवृत्तिः समीचीना तांपश्यन् नेत्रप्रदीपाकृति गवां
चंगणाः समूहः गोगणाः नेत्रप्रदीपावृत्ते गोगणाः नेत्रप्रदीपाकृतितिगोगणास्तेन आनंदं सुखं अवाप्नुवान् प्राप्तवान् आपुप्याप्राप्तौ विमृत्तो लिट् परस्मैपदं अवा
पआपत् अपुविति यथान्वया एकालोकः तमेनुदंतमः अंधकारं नुदति नपानीति तमोनुत् तेन सीतांशुं शुवा स्यंदुद्धमन्नेन नेत्रप्रदीपाकृतिगोगणेन तत
पदार्थस्वरूपविषये प्रदीपाकृतिः प्रदीपवत् दीपवत् आवृत्तिराकारो यस्य सतथो नुदीपवत्प्रकाशकः सूर्यः स्वास्यै गोगणाः रश्मिसमूहस्तेन गो स्वर्गे वृष
भेरश्माविति विश्वः आनंदं अपुयात् तथोपनुस्वाद्दुमन्नेन नेत्रप्रदीपिकाना मन्याग्रंथेन ज्ञानं आनंदं अवाप तानूत्रिविक्रमार्यान् प्रणमामीति भावः।४।
पदर्थमिष्टदेवतानमस्कारः कृतस्तदिदानीं प्रतिजानीते मुकुंदभक्त्या इत्ति विश्वगुरोः विश्वस्य समस्तस्य मुक्तियोग्यजनस्य गुरोः ज्ञानोपदेशकस्य वायो

मुकुंदभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरंतराये। गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलां॥५॥ श्रीवायवे नमः॥

मुख्यप्राणस्य गरीयसीं अतिश्रेयेन गुरुत्तमामिति यावत्। विशुद्धां निर्दोषां अवतारलीलां अवतारायां हनुमदाद्यवतारायां लीलाकर्मचरित्रमिति यावत्
लीलाविलासक्रिययोरिति विश्वः। वक्ष्यामि वदिष्यामि वचपरिभाषणे इत्यस्माल्लृट् परस्मैपदं वक्ष्यावः वक्ष्यामः इति किमर्थं प्रयोजनाय गुरुभक्तिजायै गुरो
भक्तिः गुरुभक्तिः गुरुभक्त्या उत्पद्यते इति गुरुभक्तिजा तस्यै मुकुंदभक्त्यै कुं मुं ददाति मुकुंदस्तस्मिन् भक्तिः तस्यै तादर्थ्ये चतुर्थी मुकुंदभक्त्यर्थं भक्तिर्नाम माहात्म्यज्ञान
पूर्वकः सुदृढस्नेहः मुकुंदभक्ते गुरुभक्तिजन्यत्वात् अप्यच्युतो गुरुद्वाराप्रसादकृत् इति स्मृत्यादिप्रमाणप्रसिद्धं निरंतराय एवविघ्नाय सतां सज्जनानां प्र
प्रसत्त्यै प्रसादाय च सकलमुक्तियोग्यजनगुरूत्तम श्रीमुख्यप्राणावतारचरित्रवर्णनेन सतोपि संतुष्टा भवंति सा [illegible] स्य सज्जनानुग्रहार्हा [illegible] इति
हेतुः साध्यमोक्षहेतुरिति भावः॥५॥

श्रीराम ।३१।

शर्वेंद्रपूर्वैरपि शर्वः रुद्रः इंद्रः शचीपतिः एतदादयो पूर्वे आदौ येषां तैरपि उत्तमश्लोकानां सुवैरिति शेषः मंत्रवर्यैः वेदवर्यैः ब्रह्मादिभिः स्तुत्य-
रूपैः अन्यैर्वा ऋषिभिः पुनः स्तुत्वा किंचित्सुरम्यमप्येकं कथ्यतां मया मध्यस्थः विद्वान् मध्वतः अहमप्यनुक्रमेण श्लोकः अनुवर्णनीयां अ-
नुवर्णयितुं यो यत्नः अवतार लीलां वक्तुकामः वक्तुं वर्णयितुं कामो यस्य स तथोक्तः इच्छामनो भवेत् कामः इत्यमरः मेदबुद्धौ मेदा अल्पा वि-
षयेषु इतियावत् बुद्धिर्यस्य स तथोक्तः तस्मिन् अतएव संक्षिप्नुवाक्ये संक्षिप्नुनि संक्षिप्तानि इतियावत् वाक्यानि पदसमूहरूपाणि य-
स्य स तथोक्तः तस्मिन् मयि गुणाः करुणां क्रियासु करुणं कुर्वन्तु करुणा करणे अस्माद्धातोः कर्मणि आशीर्लिङ् परस्मैपदे क्रियासुः क्रियास्त क्रियासु
इति बहुवचनं स्यैर्वर्णनीयं नायोरवतारलीलं अल्पवाक्यैः कथयइतिमहं तो न कुर्युरिति भावः यद्वा कृतं आपेषु प्रथमश्लोके उक्तः येन
मुख्यवायुना उच्चावचाः उच्चप्रवर्तकाः उच्चाश्च अवचाश्च इति द्वंद्वः अनेकप्रकाराइत्तियावत् उच्चावचा अनेक भेद इत्यमरः समस्तचेष्टाः

यो मंत्रवर्यैरनुवर्णनीयां शर्वेंद्रपूर्वैरपि वक्तुकामं। संक्षिप्नुवाक्ये मयि मेदबुद्धौ संतो गुणाख्याः करुणां क्रियासुः॥६॥ श्रीराम ।३१।
उच्चावचा येन समस्तचेष्टाः किं तत्र सिंचंति विचेष्टितानि वेद्यं॥ किं नु उत्तमश्लोकशिखामणीनां मनोविशुध्यै चरितानुवादः॥७॥७॥

समस्तव्यापाराः सर्वप्राणिनां स्युरिति शेषः सर्वेषां देहेंद्रियादि नियामकत्वात् सर्वोत्तमत्वेन येन वायुना सर्वव्यापाराः प्रेरणाया भवंति तत्र
एवं सर्वप्रवर्तक वायु चरित्रेषु मध्ये किंचिदितं वा मे विचित्रं आश्चर्यमिति निवेद्यं निवेदयितुं वर्णयितुं शक्यं न कृतानां सर्वेषामपि चरितानां वि-
चित्रत्वादरक्षित्रमिति विशेषतो वर्णयितुं न शक्यमिति भावः तर्हि न वर्णनीयं किमित्याशंकत्वे किंतु इति तत्स्योत्तरमाह उत्तमेति उत्तमश्लोकशि-
खामणीनां उत्तमः पुण्यकरः श्लोकः मशः येषां ते उत्तमश्लोकाः एषु ये शास्त्रे श्लोकः इत्यमरः तेषां शिखामणय श्रेष्ठाः उत्तमाः अग्रेसराः इत्यर्थः उ-
त्तमा इतियावत् तेषां चरितानुवादः चरितानां चरित्राणामनुवादः अनुवर्णनं मनोविशुध्यै मनसः हृदयस्य विशुध्यै तादर्थ्ये चतुर्थी रागद्वेषादि दोषरहि-
तार्थस्यात् अतो वर्णनीयमिति भावः

म०१ त्रिविक्रमपंडिताचार्याणां आस्यवस्त्रेव क्रास्येव वदनं तुंमानं आननं मुखमित्यमरः ॥ निदेवसीतानु ः शीतलः अत्र चंद्रकिरणाः यस्य सन्तीतां तुंस्य वक्र । ध्व०
विरयोस्त्री मयूखांशुरित्यमरः ॥ सीतांशोः मुखादुमन्नेन तेन तत्प्रदीपाकृतिगोगणेन तत्प्रदीपाख्यव्याख्यानस्य आवृत्तिः समीचीनतां पश्यन्न तत्प्रदीपाकृति । गवां
चं गणाः समूहः गोगणः तत्प्रदीपाकृते गोगणः तत्प्रदीपाकृतगोगणास्तेन आनंदं सुखं अवाप्नुवानः प्राप्नुवानः आप्नुव्याप्ताविति धातोर्लिट् परस्मैपदं अवा
प्नुयात् अपुविति यथान्यराकालोकनं तमेनुसतमः अंधकारं नुदतीति नप्रा नीतित मेनुतु तेन सीतांशुमुखात् चंद्रमुखान्नेन तत्प्रदीपाकृतिगोगणेन तेन
पदार्थस्वरूपविषये प्रदीपाकृतिः प्रदीपवत् दीपवत् आवृत्तिराकारो यस्य स तथोक्तः दीपवत् प्रकाशकः सूर्यः स्यास्ते गोगणाः रश्मीसमूहश्च तेन गोस्वर्गेभूष
मेरुश्वावितिविश्वः आनंदं अप्नुयात् तत्थोयं मुखादुमन्नेन तत्प्रदीपिकानामग्रंथेन जनः आनंदं अवाप्तानुत्रिविक्रमाचार्यान् प्रणमामीति भावः ॥४॥
पद्यैरिष्टदेवतानमस्कारः कृतः इदानीं प्रतिजानीते मुकुंदभक्त्यै इति विश्वगुरोः विश्वस्य समस्तस्य मुक्तियोग्यजनस्य गुरोः ज्ञानोपदेशकस्य वायो

मुकुंदभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरंतरायै । गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलां ॥५॥ श्रीवायवेनमः ।

मुख्यप्राणस्य गरीयसीं अतिशयेन गुरुतमामिति यावत् । विशुद्धां निर्दोषां अवतारलीलां अवताराणां हनुमदाद्यवताराणां लीलाश्चेष्टाः सन्ति इति तमिति यावत् ।
लीलासन्तीत्यस्य वेति विश्वः । वक्ष्यामि वदिष्यामि वच परिभाषणे इति धातोः लृट् परस्मैपदं वक्ष्याव वक्ष्यामः इति । कस्मै प्रयोजनाय गुरुभक्तिजायै गुरो
र्भक्तिः गुरुभक्तिः गुरुभक्त्या उत्पद्यत इति गुरुभक्तिजा । तस्यै मुकुंदभक्त्यै मुकुंदभक्तिः तस्यै । तादर्थ्ये चतुर्थी मुकुंदभक्त्यर्थं भक्तिर्नाम माहात्म्यज्ञान
पूर्वकः सुदृढः स्नेहः । मुकुंदभक्ते गुरुभक्तिजन्यत्वात् अप्रच्युतो गुरुद्वारा प्रसादकृदहं भवतीत्याद्यप्रमाणसिद्धं निरंतरायै विच्छिन्नायै सतां सज्जनानां
प्रसत्त्यै प्रसादाय च सकलमुक्तियोग्यजनगुरुतम श्रीमुख्यप्राणावतारचरित्रवर्णनेन सन्तोपि सन्तुष्टा भवंतीति सतां च सज्जनानां गुरुद्वारा हरिभक्ति
हेतुः साध्यमोक्षहेतुरिति भावः ॥५॥

सू॰।

वा॰।७।महतः सज्जनाः तच्चरितारव्यरत्नैः तस्य मुख्यप्राणस्य चरितानीति॥ आख्या नाम पृषत्तानि तत्र येन निताः निरताः निपद्यैः प्रराणादिभिर्याय्यश्च
तैः रत्नमणिद्वये स्थमुक्ता मुक्तादिके चेत्यमरः। मालाकृतः। माला स्रजं करोतीति स्वयति इति मालाकृत्तस्य मे मम। पूर्वापरीकारं पूर्वस्य प्रथमतो वर्णनीयस्य च
रितस्य अपरीकारं पश्चाद्वर्णने प्रकारं वा पश्चाद्वर्णनीयस्य च रितस्यादितो वर्णनमपि चेदर्थी हं तत्र अनुकंपायां हर्षे वा पृच्छ हर्षेनुकंपायामित्यमरः। मुहुर्मुहुः क्षा
म्यंतु सहंतु। क्षमसहने इत्यस्माल्लोट् परस्मैपदं। क्षाम्यंतु। क्षाम्यतां। क्षाम्यंत्विति पूर्वापरीकारस्य निमित्तमाह। असूक्ष्मदृष्टेरिति। सूक्ष्मा गूढार्थविषयिणी च दृष्टिः ज्ञा
नं न विद्यते सूक्ष्मदृष्टिः ज्ञानं यस्य स तथोक्तः। तस्य। दृष्टिर्ज्ञानेऽक्ष्णि दर्शने इत्यमरः। अत एव पूर्वापरीकारादिकं संभावितमिति भावः। असूक्ष्मदृष्टेरपि परामर्शेन
पूर्वापरीकारादिकं परिहर्तुं शक्यते तत्राह। शक्यतदृशादृश्यमित्याह। सुकुतूहलस्येति। सुकुतूहलस्य। कुतूहलं कौतुकं औत्सुक्यमिति यावत्। तेन सहितस्य। कौतूह
लं कौतुकं च कुतूहलमित्यमरः। संतोषयुक्तहृदयेन परामर्शानवसर इति भावः। अयं भावः। यथा कश्चिन्मालाकारः अनवधानतानिसंभृतः सोत्रमयुक्तः सन् अनुक्रमं
विहाय पूर्वापरीकारादिकं कुर्यात्तद्वदहमपि स्वतो मंददृष्टिः सन् चरितारव्यरत्नादृष्ट्वा संभ्रांतो ते किरणाः सन् यदि पूर्वापरीकारादिकं कुर्यां तर्हि महतोऽनुकंपयोन
तुमुहुः क्षाम्यत्विति।२।नायेरेवतारल्लीलीवस्याभिहुत्ती तत्र हनुमदवतारस्य प्रथमहात्तलीलां च कुमाभ्रते श्रीवल्लभाज्ञाभिप्रायादिना। प्राधिगयाप्रयेत प्राधान

मालाकृतस्तच्चरितारव्यरत्नैरसूक्ष्मदृष्टेः सुकुतूहलस्य। पूर्वापरीकारमथापरं वा क्षाम्यन्तु मे हंत मुहुर्महांतः॥२॥ श्रीवल्लभाज्ञां स सुरेंद्र
याच्ञां संभाव्यसंभाव्यतमां त्रिलोक्यां। प्राणेश्वरः प्राथितगर्भापरो नागुरुः सत्तां चेत सखिवोह्यभूतु॥३॥ श्रीगुरुभ्यो नमः श्रीरामाय॥

चेतनानां प्राणानां तु चेतनोऽजन्मीत्यमरः। जदणाः बहुधा समुदायास्तेषां प्रणेता नायकः अधिपतिर्नायिने नेत्यमरः प्रेरक इति यावत् सेना मुक्तियोग्यानां गुरुः ज्ञानो
पदेशप्राणो स्य प्राणो समुदायास्तेषां ईश्वरः प्राणानामिंद्रियाणामिमानि सूर्यादि देवतानामीश्वरः श्रेष्ठः मुख्यप्राण इति यावत्। केसरिणः केसरिनाम्नो वानरस्य
गृहे भार्यायां जनिः स्त्रीगृहवर्गी गृहमित्यमरः। अभूत् प्रादुरभूत्। भू सत्तायामित्यस्माल्लट् परस्मैपदं अभूत् अभूतां अभूवन् इति। किं कृत्वा। सुरेंद्रयाच्ञां। सुरेंद्रा देव
श्रेष्ठाः तेषां याच्ञां प्रार्थनां। स्वामिन् भगवान् अवतीर्य राक्षसनिग्रहं करोतु इत्येवं रूपो यः प्रार्थः तया सह तां याच्ञामित्यर्थः नाराद्रिश्चेत्यमरः। त्रिलोक्यां लो
कत्रये संभाव्यतमां। संभावयितुं बहुमानयितुं योग्या संभाव्या अतिशयेन संभाव्या संभाव्यतमा तां सर्वैर्देवैः स्वस्य मंगीकरणीयामित्यर्थः। श्रीवल्लभाज्ञां।

प्रथमस॰।

श्रियः च ब्रह्मस्य दर्शितस्य नारायणस्य आज्ञांकार्यं कुर्विति नं नुपां औ थं वाच संभाव्य आद्यमांगीकृत्येतियावत् ।।९।। येयेति । येयेगुणानामगुणा शब्दवाच्यत्वे
नेत्यर्थः जगत्प्रसिद्धाः सन्ति तेषु गुणत्वेन जगत्प्रसिद्धेषु च येषु महत् तज्ज्ञानिनः यं वै सरिपुत्रं दर्शयन्ति स्म दृष्टांतमनुर्वन्तु निपूर्वस्त्रिस्थिरप्रेक्षयोस्मन्तोलिट्
परस्मैपदं दर्शयन्ति दर्शयन्तः दर्शयन्ति । स्मशब्दयोगेन न लट् भूतार्थवक्तलट्परस्मैसूक्तेः तमेनं केसरिपुत्रं हनूमंतं हनूमन्तं प्रकं आहुः वदन्ति ब्रुवन्ति ।
यां वा निदृश तो लिट् परस्मैपदं आह अहतुः आहुरिति । यस्मात् ह नुर्वा ख्याः सर्वेपि ज्ञानोदयो धर्मा अस्मिन् केसरिपुत्रे संतीति ज्ञानिप्रसिद्धं ज्ञाने

ना

ये ये गुणा नामजगत्प्रसिद्धा यं तेषु तेषु स्म निदर्शयन्ति । साक्षान्महाभागवतप्रबर्हं श्रीमंतमेनं हनुमंतमाहुः ।।१०।। श्री ।।
कर्माणि कुर्वन्नु परमाद्भुतानि सभास्वदेवीषु सुरभ्राजमानानि । स्वग्रीवमित्रं स जगत्पवित्रं रमापतिं रामं ननुद्ध ।।११।।

श्रीराम ।।७।।

वैराग्ये हरि भक्तिभावे धृतिस्थितिप्रापावले घुये गेषु श्रुतेः हनुमेत्राह्वो ज्ञानचान्यथुक्तेः हनुमेत्राब्दस्य ज्ञानवाचित्वात् हनुश्रावेदनवैराग्यादि सर्वेषां गुणा
शब्दवाच्यानां उपलक्षयतया ग्रहणात् हनरस्यास्तीति व्युत्पत्त्या ज्ञानोपलक्षितसर्वगुणाश्रयत्वस्य प्रतीतेः । येनं केसरिपुत्रं हनुमंतं वदंतीति भावः । कि
यं भूतं एनं । साक्षात् मुख्यतः महाभागवतप्रबर्हं भगवतः इमे भागवताः भगवद्भक्ताः सर्वः महत्तस्य ते भगवद्भक्ताश्च महाभागवताः । तेषु प्रबर्हं मु
ख्यं । मुख्यवर्यवरेण्याश्च प्रबर्हानवराध्यवत् इत्यमरः । पुनः कथंभूतं । श्रीमंतं श्रीकांति ः सेपत्त्रस्यास्तीति श्रीमान् तं । श्रीपद्मा कांति संपदारिति
धनंजयः इंद्रवज्रावृत्तं ।।१०।। कर्माणीति । परमाद्भुतानि । परममहत्तं अद्भुतानि आश्चर्याणि देवीषु देवानां संबंधिन्यः दैव्यः ताः सु सभासु प्रभाजि
तानि आदृत्तानि कर्माणि चरितानि विकुर्वन् सुग्रीवमित्रं । सुग्रीवस्य तन्नामवानरस्य मित्रं सखा अथिमित्रं सुहृत् सखेत्यमरः । मित्रशब्दो नित्य
नपुंसकः । स हनूमान् जगत्पवित्रं जगत्सु हुं जगत् लोकं पावयति पवित्रीकरोतिस्वदर्शनादिनेति जगत्पवित्रमितिवा रामं ननु रामे राघवे रामा रव्यं तं
नुरामानत्तारं रामेश्च असैननु श्च्येति विग्रहः रमापतिं रमायाः इंदिरायाः पतिं भर्तारं धवः प्रियः पतिर्भर्ता इत्यमरः ददर्श दृष्टवान् दर्शनं प्रेक्षणे परस्मै

श्रीराम ।।७।।

म०॥

न्निदुः परस्मैपदं दक्तव्यदि इत्युक्तेः शुः॥११॥ पादारविंदमिति तदा रामदर्शनकाले महाभक्तिभराभिनुन्नः महती च सा भक्तिश्च महाभक्तिः सैव भरः
भारः अतिशयभार इत्यमरः तेनानुन्नः प्रेरितः अत एव पादारविंदं प्रणतः पादौ च तौ अरविंदे इव पद्मा चिव पुंसि पद्मं नलिनं अरविंदं महोत्प
लमित्यमरः तयोः प्रणतः प्रकर्षेण प्रह्वः हरीन्द्रः हरीणां वानराणां इन्द्रः ईशिता यद्वा सूर्ययमे विष्णौ वासवे दुर्दरिहर्यो मृगेंद्रे वानरे चवाजियोर्दशस्वपि
हरिः स्मृत इति धनंजयः महेंद्र इन्द्रे ईशितेति त्वा सह हनूमान् पुराणेन पुरातनेन पुराणं प्रोक्तं नपहे पुरातनं चिरातने इत्यमरः पुरुषेण पुरुषेण पुरुषाः पूरुषाः नरा इत्यमरः

प्रथमस॥

पादारविंदप्रणतो हरीन्द्रस्तदा महाभक्तिभराभिनुन्नः॥ अजानुदीर्घोदरसुंदराभ्यां दोर्भ्यां पुराणेन स पूरुषेण॥१२॥ श्रीरामः॥

रामेणेपोषर्षः पद्मोदरसुंदराभ्यां पद्मस्य कमलस्य उदरं नवं अंतस्थदलं तद्वत् सुंदराभ्यां मनोहराभ्यां दोर्भ्यां कराभ्यां अग्राहि आपित इति यावत् गृह
उपादाने इह स्तनः कर्मणि लुङ् आत्मनेपदं अग्राहि अग्राहिषातां अग्राहिषत इति अत्र भुजदंडप्रवेशे दोर्दिष्यमरो क्तेः दोः त्रो वयस्या भुजवाचकोपि दो
र्दंडकरा वेदा द्वाप्योपमेदन सुंदराभ्यामित्युक्तेः पद्मोदरवत् सौंदर्यं करयोरेव नास्ति न तु भुजयोरिति हेतोः यथा भारमुद्वहन् कश्चित्पुरुषः येन
स्विपुरुषेणानुगृह्यते तथा अस्यारण्ये महाभारमुद्वहन् हनूमान् रामेणागृहीत इति श्लोकाभिप्रायः॥१२॥ अदर्शयदिति अदर्शयत् सालान् बलिदारणो नादा
रयितुं त्राक्याः दार्याः अदर्शयत् रामं तदैन भेषाद्यः तेन चैते साला अश्वत्थाल वृक्षा अश्वत्थपा मावलिः पत्तितत्स्याः दारणं भेदनं येनं सतथो
क्तः अत्र सालः पादपमात्रे स्यादिति अभिधानात् साल शब्दस्य सामान्यत्वेः यावद्वृक्षवाचित्वेपि वृक्षविशेषाः तालवृक्षा एव ग्राह्याः रामाय
वोलतेः बीष्यालिखा बालि पाडः इत्यमरः व्यापादितेंद्रप्रभवेन इंद्रात्प्रभवः उत्पत्तिर्यस्य सः इंद्रप्रभवः तस्य बालिनः कुर्वन्ति परमाद्भुतानि सभासुदे
विषुसभाजितानि श्रीवमित्रं सजगाम विद्वरमापतिं राम तनुं ददर्श॥१३॥

मवः। व्यापादितः हिंसितः इंद्रप्रभवेण। नीयेन सतत्योक्तः तेन अतएव निकामं नितरां। प्रायोतनिप्रीतिकृता। प्रद्योतनः सूर्यः प्रद्योतनो दिनमणि
रिति सूर्यपर्यायामरः। प्रद्योतनस्यापत्यं पुमान् प्राद्योतनिः सुग्रीवः तस्य प्रीतिं हर्षं करोतीति प्रीतिकृत् तेन मधुद्विषा। मधोः मधुनामकस्य दैत्यस्य द्विट् तेन
रामेण वीरः पराक्रमी शूरो वीरश्च विक्रांत इत्यमरः। आदिश्यात्त गामीति यावत्। सहनूमान् संदिदिशे। सीतान्वेषणार्थं प्रेषितः। सपूर्वदिक्चक्रे
ण पनरस्तोकमविप्लिष्टमुनेपदं। दिदिशे। दिशिज्ञातेदिदिशिरेइति। ।१३। कर्पांतिमिति। गुणगृहीता परा क्रमौदार्यधैर्यप्रतापैः सौजन्य माधुर्य
जया नृपाद्यैः। गांभीर्यसत्वतुर्यैः सुवीर्यश्चैर्यैर्हि नृप तो नहि धनुरस्ति लोकया। इत्यादि नूपहनुमन्मुखान्गृहीता। अलानतः। रणकोविदेन रणे। युद्धे कोवि
दिना सुधिया। युद्धकर्मविषये महाज्ञानिने स्पर्धः। सनूसुधीः कोविदो बुधः इत्यमरः। व। पाति। कपिस्यांतिसमीपं अंतपदार्थसामीप्येति धनंजयः।
श्रीराम ।१५।। आनीय प्राप्य रहसि चके व्यं वक्तुं इति भावः। मुक्तः प्रेषितः स्फुरन्नूज्ञो भयानः सत्त्वक्षयांति। सत्त्वपक्षपातः स्नेहः अस्यास्तीति सततयोक्तः। अ
नौ नूमान्वैरिभयंकरः। वैरिणां अरीणां। रिपुर्वैरिसपत्नारिरित्यमरः। भयंकरः। भीतिजनकः अभून्। तत्रदृष्टंतमाहप्रदरइति। गुणगृहीता॥
अप्रायसिलावलिदारखोन व्यापादितेंद्रप्रभवेन तेन। प्राद्योतनिप्रीतिकृतानिकामं मधुद्विषा संदिदिशे सवीरः॥१३॥
कर्पांतिमानीयगुणागृहीता रामेण मुक्तो रणकोविदेन। स्फुरन्नसौ वैरिभयंकरोभूत् सत्त्वक्षपाति प्रदरो यथाग्य्यः॥१४॥ श्रीराम १५।।
गुणः मौर्वी मौर्वी ज्या शिंजिनी गुण इत्यमरः। गृहीता। धनुर्भृता। मौर्वीकर्षणयोगेति यावत्। रणकोविदेन रामेण। कर्पांतिमानीय मुक्तः सत्त्व
क्षपाति। सः। तः। नो। समाना। अस्य तेपक्षा अस्येपक्षिपत्त्रा अपिच सत्त्वपक्षाः। सत्त्वक्षैः पातः गमनमस्यास्तीति सततयोक्तः। गरुत्पक्षच्छदापत्रमित्यमरः।
अग्र्यः ऋजुत्व निशितत्वादिगुणयुक्तत्वेन श्रेष्ठः प्रदरः शरः प्रदरः शरभंगयोरिति विश्वः। यथा वैरिभयंकरो भूत्तथेत्यर्थः। ।१४। गोभिरिति। गोभि
र्वाचोभिः समानंदितनूपसीतस्य समानंदितं संतोषितं नूपं स्वनूपं यस्याः सा समानंदिता नूपमेनूपसीता तान कीयेन सततयोक्तः। स्वंवह्निनिर्दि
ग्धपत्नाभिराक्तिः। स्वेन स्वकीयेन स्वपुच्छगेनेत्यर्थः। आत्मीयस्वो स्त्रियाधमेत्यमरः। वह्निना अग्निना निर्दग्धः भस्मीकृतः पत्नमां
संजत्संनिति भुजंगीलिपला। शिना।

म०॥ राक्षसाः।वनेस्वादेमिषेपलमित्यमरः।तेषांराशिः पुंजः।स्यान्निकायःपुंजराशीत्यमरः।स्ववह्निनिर्दग्धःपलाशिराशिर्येनस[illegible]।अ ध्व॥
सौहनूमन्ननवारिदः।हनुमान्हनूमानितिशब्दभेदे विश्वः।नवःनूतनःवारिदोमेघः।तद्विद्वान्वारिदःबुधनृतृस्यमरः।तीर्णाबु
धिःपुनपितुतीर्णः।अंबुधिःसमुद्रःयेनसतथोक्तः।विष्णुपदे।विष्णोःवामनस्यपदेपादेननामितनमः।अकारणम्प्रहस्तेत्राबन्धेचेमतौ।लिट्
परस्मैपदं।पदंशब्देचवाक्यच्चव्यवसायापदेशयोः।पादचिह्नयोःस्थानत्राणयोर्लक्ष्मवस्तुनोरितिविश्वः।मेघपक्षेतुगोभिर्जलैः।भूचा
न्वादिषुगोमतेतिविश्वः।समानंदिततनूपसीतः।समानंदिततनूपाः।आप्यायितस्वनूपाः।सीताःसस्यानियेनसतथोक्तः।अत्रसीतालांगल
पद्धतिःस्यमरकोशेते।लांगलपद्धतिवाच्यकेनसीताशब्देनलक्षणयालांगलपद्धतिसम्पन्नसस्यानिगृह्यंतेतिज्ञेयं।स्ववह्निनिर्दग्धप
लाशिराशिः।स्ववह्निनाविद्युल्लक्षणवह्निनानिर्दग्धपलाशिनोद्रुमायोराशिर्येनसतथोक्तः।पलाशोद्रुमागमद्रित्यमरः।एवंभूतःसनूती
र्णांबुधिःवायुवशात्समुद्रमतीत्यदेशांतरंगतःसन्।यथाविष्णुपदेआकाशे।वियद्विष्णुपदंवापीत्यमरः।नमत्तत्रलोनोभवेत्

गोभिःसमानंदिततनूपसीतःस्ववह्निनिर्दग्धपलाशिराशिः।अहोहनूमन्नववारिदोऽसौतीर्णांबुधिर्विष्णुपदेननामः॥७५॥

तद्इति श्लेषाभिप्रायः।अहोआश्चर्यंहनुमच्चरितमितिभावः।अहोहीतिचविस्मयेत्यमरः॥७५॥अपक्षपातीति।असौहनुमान्।उरुपराक्रमोविषु
रुरः।वेगास्य।परोक्रमोनयस्यपराक्रमस्यतासुविषयेषुपततगाधिराजः।पतगाःपक्षिणस्तेषामधिराजःपतगाधिराजः।गरुडः।[illegible]
एन्व्इतिचट्प्रत्ययः।तेजिगायजितवान्।जिजये।कर्तरिलिट्परस्मैपदं।जिगायजिग्यतुःजिग्युः।एतन्हनुमतःगरुडजयरूपंकर्मचित्रंआ
श्चर्यं।आलेख्याश्चर्ययोश्चित्रमित्यमरः।ब्रूतःहनूमान्अपक्षपातीपुरुषःपुरुषपराक्रमवान्पक्षाभ्यांपातःगमनंअस्यास्तीतिपक्षपाती।
तिपक्षपाती।गरुडस्तुपक्षाभ्यांपततीतिगच्छतीतिपक्षपाती।अभोगभोक्ता।भोगानांस्त्र्यादिविषयभोगानांभोक्ताभोगभोक्तातादृशोनभवतीति

अभोगभोक्ता ब्रह्मचर्यनिरतत्वादिति भावः। गारुडस्तु भोगानुसर्पदेहान् भुङ्क्ते। भोगे सुखे स्त्र्यादिभृत्यावहेश्च पयाकारयोरिति अमरः। विश्वंभ
रो नारायणनाम्नि विश्वंभरः। वोढुं भजेदिति विष्णुपर्यायः। बिभ्रन्नुद्वहन्। यद्यपि भगवद्देहं न तेन विश्वंभरं वोढुं न हि गरुडस्याप्यशक्तत्वं तथापि
गरहितपक्षाभ्यां पतनरहितत्वस्य हनुमतः। भोगभोक्तृपक्षाभ्यां पतनस्य गरुडस्य जयश्चाश्चर्यमिति भावः॥१८॥ निबध्येति। एष कः। एषरवए
व कः। स्याद्येविप्रश्नयः। एष हनुमान् रघुवंशकेतुः भुजंगसंभ्रांतपयोब्धिमध्ये रघोः रघुराजस्य वंशः संततिः। केतुः ध्वजस्थानीयः। एतहस्तद्वदुध्वजे
केतुरित्यमरः। रामः। भुजगः सर्पः। तस्य भृत्यो भंगिः विक्षेपः। तेन संभ्रांत उद्विग्नः भीत इत्यर्थः। स्य। सोपयोधिः समुद्रः। तस्य मध्ये। सोत्रमः। सा
ध्वसोपि स्यादित्यमरः। सेतुं निबध्य बंधयित्वा कपिसैन्यस्य लंकां प्रति गंतुं योग्यं मार्गविशेषं पर्वतादिभिः कृत्वेति यावत्। तेन सेतुना लंकां गत इति

श्रीराम ॥१८॥

अपक्षपाती पुरुषं विशालो व्यामभोगान्नो कापतगाधिराजे। निश्वंभरं बिभ्रदसौ लिगाय हूरापराक्रांतिषु चित्रमेतत्॥१९॥
निबध्य सेतुं रघुवंशकेतुर्भुजंगसंभ्रांतपयोब्धिमध्ये। मुष्टिप्रहारैर्दशकायसीमा संतर्जनाग्र्योत्तरमेष कोदान्॥२०॥

श्रीराम ॥१८॥

शेषः। दशकाय दशकानि शिरांसि यस्य दशकः तस्मै रावणाय अर्कं सिरो जलप्रख्यातमिति चरर स्विः। मुष्टिप्रहरैः मुष्टिना प्रहारैः उरसि ताडनात् ना
मसा तुद्दत्त वानुदातृदान इत्युक्तो न्ल्ड्। परस्मैपदं अदात् अदर्गान्दुरिति। कथं मुष्टिप्रहारैः सीतासंतर्जनाग्र्योत्तरं। सीतायाः जानक्याः संतर्जनस्य
भर्त्सनस्य अग्र्यं उत्तरं उत्तरभूतं॥२०॥ स हनुमान् जाज्वल्यमानो ज्वलराघवाग्नौ। जाज्वल्यमानः अत्यंतं ज्वलन् स नु रावणस्य क्रोधाग्नि
रित्यावत्। उज्ज्वलः प्रकाशमानः रघोर्गोत्रापत्यं पुमान् राघवः जाज्वल्यमानश्चासौ उज्ज्वलश्चासौ राघवः रामचंद्रश्च स एवाग्निः यस्मिन् स
जाज्वल्यमानो ज्वलराघवाग्निः। यस्मिन्। सुग्रीवसुयायजूके। सुग्रीवो नाम्नः सपूज्यः समीचीन इतियावत्। यजमानः यस्य सत्तयोकः तस्मिन्
सुपूजयां भृशार्थेनुमितिः कृष्णसमष्टिश्वेति विश्वः। युधमरवे। युद्धमरवइव यज्ञइव तस्मिन् यत्र सो बोधयो गौरिः सम् पूतनुमरिबः क्रतुरित्यमरः॥

प्रतिप्रस्थात्रा। प्रतिप्रस्थातृनामकऋत्विग्भूतेन सुमित्रातनयेन। सुमित्रायाः तनयेन पुत्रेण लक्ष्मणेन आत्मजस्तनयः सूनुः सुतः पुत्रः इत्यमरः। सा
कं सह। साकं सत्रा समं सह इत्यमरः। अध्वर्यवं अध्वर्योः अध्वर्युनामकऋत्विजः इदं आध्वर्यवं अध्वर्युव्यापारमित्यर्थः चक्रे। कृतवान्। उक्तं सूत्र
पाठ्मृत्तो लिट्। आत्मनेपदं। चक्रे च कान्ते च निरेति। पद्वेष्टि अध्वर्यादयः ऋत्विजः सवेषु यजमानश्च स्यादग्निश्च प्रवेतृ। युधाख्ये यज्ञे च राम एवाग्निः सु
ग्रीवो यजमानः हनुमानध्वर्युः प्रतिप्रस्थाता लक्ष्मणः अंगदादयः होत्राग्नीध्रादयः ऋत्विज इति ज्ञेयं इंद्रवज्रा वृत्तं।७८। रामस्त्वनि। तात्पर्यं सप्तमी

जाज्वल्यमानो ज्वलराघवाग्नेश्चक्रे स सुग्रीवसुयायजूकः। आध्वर्यवं पुष्पमखे प्रतिप्रस्थात्रा सुमित्रातनयेन साकं।७८। रामस्त्व
नेयानयतः प्रसूनं द्वाभ्यां कराभ्यामनवस्रयतः। एकेन दोष्णा नयतो गिरींद्रं संजीवनाख्यं यमस्य नाभूत्।७९। श्रीरामः।

रामस्यार्चनेपूजार्थं द्वाभ्यां कराभ्यां प्रसूनं कुसुमं प्रसूनं कुसुमं सुमनमित्यमरः। नयतः उद्धरयतः। पः प्रयतः प्रयासः अभवत् आसीत्
न्यूसताभ्यां कैरीर्ष्यात् लङ् परस्मैपदं। स प्रयतः एकेन दोष्णा हस्तेन संजीवनाख्यं संजीवन नामक ओषधः वृक्षः स एवाग्रः आदिर्य
स्मिन् संजीवनाद्यः तं गंधमादनपर्वतं नयतः उद्धरनयतः अस्य हनूमतः नाभूत्। सृत संजीवनयौषधयार्थे गंधमादनपर्वतं एकेन हस्ता
न उद्धृत्य गच्छतो हनूमतः पुष्पोद्धरणादिप्रयासः तेवानपि नाभूत् इंद्रवज्रावृत्तं।७९। स इति। हनुमान् दारितारिं दारिताः
निहताः अरयः रावणकुंभकर्णादिवैरिणः येन स तथोक्तः तं। द्विपुचेदिसपत्नः रिपुरित्यमरः। परमं। स वेत्ति मं पुमान् सपुरुषं। स्यात् पुमांसः पंचज
नः पुरुषाः पूरुषा नरा इत्यमरः। राममित्यर्थः। समन्वयासीत् सम्यक् अनुसृतय ये जिग। मारावणादीन् हत्वा अयोध्यामभिमुखं यातो रामं अनु
ययावित्यर्थः। ये प्रापणे इति धातो लङ् परस्मैपदं अयासीत् अ यासीष्टां अयासिषुः। कथंभूतं पुमांसं। वह्निप्रवेशादि गतान् लसुध्या वह्नौ ज्व
लयमानाग्नौ प्रवेशेन अधिगता जनैः सम्यक् ज्ञाता अंत्यमेनः स्वस्याः शुद्धिं याति ब्रह्मपरपुरुष संगराहित्यादि रूपया स्याः सा तथोक्ता नया

वन्हिप्रवेशाधिगतामशुध्या। नरदेवपुत्र्या। नरदेवस्य जनकराजस्य पुत्र्या सीतया विराजितं शोभमानं कयेव। वन्हिप्रवेशाधिगतामशुध्या
कांचनमालयेव। सुवर्णमालिकयेव। सुवर्णस्याग्नौ प्रक्षेपणेन यथा शुद्धिरवगम्यते। एवं सीतायाः अपि अग्निप्रवेशेन निर्दोषित्वे संजातैरव
गतमिति भावः। २०। श्याममिति एषः हनूमान् श्यामं श्यामवर्णं विलोकितवान्। श्याम इत्यमरः। स्मितास्यं स्मितं मंदहासयुक्तं आस्यं वदनं य
स्य तं। पृथुदीर्घहस्तं पृथू स्थूलौ दीर्घौ आजानुपर्यंतं लंबमानौ हस्तौ पाणी यस्य तं। सरोजनेत्रं। सरोजवत् कमलवत् नेत्रे यस्य
तं। गजराजयात्रं। गजराजस्य गजश्रेष्ठस्य यात्रेव यात्रा गमनं यस्य तं। यात्रानुयानेपि स्यादिति विश्वः
जगन्मंगलं जगतां लोकानां मंगलं श्रवणाद्दर्शनात् स्मरणाच्च शुभम्। मंगलं शुभमित्यमरः। दृश्यां चक्षुर्ग्राह्यां
दृष्टिं चक्षुः। दृष्टिर्नेत्रमित्यमरः। सिषेवे। सेवृ सेवायामिति धातुः लिटि रूपं। सिषेवे इति। दृश्यामित्युपलक्षणं श्रवणकीर्तनं वि
ज्ञापनमिदं सर्वं कृतवानित्यर्थः। अनेन हनुमान् बहुप्रकारेण रामसेवां चकारेति भावः। २१।

स दारितादिं परमं पुमांसं समन्वयासी नरदेवपुत्र्या। वन्हिप्रवेशाधिगतामशुध्या विराजितं कांचनमालयेव॥ २०॥ श्याममितास्यं पृ २
थुदीर्घहस्तं सरोजनेत्रं गजराजयात्रं। वपुर्जगन्मंगलमेष दृश्यां विराद् यौ ध्याधिपतेः सिषेवे॥ २१॥ श्रीगुरुभ्यो नमः श्रीरामः॥

राज्येति। सीता जानकी राज्याभिषेके। रामस्य राज्ये साम्राज्ये अभिषेके अवसिते समाप्ते सति हे सीते हे इनः अस्मान् भजतां मध्ये श्रेष्ठस्य अतिशयिने
प्रियायै तां मालां दित्सुर्दातुमिच्छुः। दिशां सज्जनिदृश्यतो लोटपरस्मैपदं दिश। दिशताच्च। दिशं चु। दिशतेति रामस्य वाक्यं। वाच्या वाणी सरस्वती इ
त्यमरः। मणिमंजुमाला व्याजेन। मणीनां पद्मरागादिनवरत्नानां मंजुः मनोज्ञा या माला मालिका तस्याः व्याजेन। कैतवबंधान्मिषेण। मनोज्ञं मंजु मंजु
लमित्यमरः। अत्र अस्मिन् हनुमति हीयंति विच्छिन्नां करुणां दयां बबंधाच्चकार। बंध बंधने इति लिटि परस्मैपदं बबंध बबंधतुः बबंधुः अत्र सीतया ह
नुमते हेममालां बंधने कृते सति वैरूप्ये सति निरदमालाबंधने कृते तु कृपा बंधनमिति इंद्रवज्रावृत्तं। २२। सेवाप्रसन्नः। सेवया शुश्रूषया प्रसन्नः संतुष्टः देवः रामः
अस्मै हनुमते। सहभोगं सहभोगनामकं सहलोकाधिपत्यं दिदेश ददौ। दिश अतिसर्जने दृश्यतो लिटि परस्मैपदं दिदेश दिदिशतुः दिदिशुः कोयं भूचारो रामः उरसौ

श्रीराम ॥७॥

म०१ हृतेत्यत्र हृदस्येदं सौहार्दं स्नेहः अत्र हृदस्य हृद्भावो निपात्यते हृदा मनसा प्रेमेण हस्ते न प्रियत्वात्। हार्दं प्रेम स्नेहः इत्यमरः। अधि मौलि मौलौ इत्यधि
मौलि। अव्ययीभावः समासो अयं शिरसीत्यर्थः। न्यस्तेन हस्तेन पाणिना। दयार्द्रदृष्ट्या। दयया कृपया आर्द्रा क्लिन्ना युक्ता या दृष्टिः तया। सप्रसादं दृष्ट्वा अ
नु तत्प्रसन्ननयनेनेत्यर्थः। अमृतकल्पेन वाचा। अमृतस्य सुधायाः कल्पा ईषदसमाप्ता वाक् तया हनुमतः ज्ञानभक्त्यादीनामपि समानो नास्ति स्वभावत्वात्
मौलौ च तुष्टिप्रतिकर्तुं शक्यता नास्ति इति स्नेहपूर्वकं अमृतकल्पं वाक्यं विधेयं इयं सर्वापि तृतीया इत्थंभूतलक्षणे तथा च रामो राजा जानकी द्रक्षीदिति तोषलक्षि
तो राजा जानकीमिति वत्। अत्रापि रामः स्नेहपूर्वकहस्तादिभिरुपलक्षितः दृष्ट इत्यर्थो भवति। २३। रामस्य तस्माद्धनुमतः अन्यः पुरुषः प्रेष्ठः अतिशयेन प्रियः न बभूव
हनूमानेव रामस्यातिशयेन प्रियो भूदिति भावः। भूसत्तायामिति धातोर्लिट् परस्मैपदं। बभूव बभूवतुः बभूवुः। रामराज्ये रामस्य राज्ये। किं सितं किमपि वस्तु अ
सुलभं सुलभं न भवतीत्यसुलभं दुर्लभमित्यर्थः। नाभूत् किंतु सर्वं सुलभमासीदित्यर्थः। तथापि स्वयं रामप्रियः सर्वविरक्तो सौलभ्येपि एषः हनूमान् विषयसुखं
निनेषत् नापेक्षितवान्। इष इच्छायामिति धातोर्लुङ् परस्मैपदं ऐषीत् ऐषिष्टां ऐषिषुः इति। कथंभूतः एषः त्वत्पादसेवासक्तः पादसेवाभोगान्नेषदिति भावः। अनेन ह
नुमतो अतिविरक्तिः कथिता भवति। तदुपयादयति। न स्थिति। सा स्वयोग्ये भोगसौलभ्येपि हेयता मतिरेव विरक्तिः भोगिनं तु विरक्तिः ननु वैराग्यं हि। २४। हे नाथ प्र
नाथः परिवृढः प्रभुरित्यमरः। ते तुभ्यं नमो नमो नमः हे राम ते तुभ्यं नमो नमो नमः हे नाथ तेतव चरणारविंदे पुनः नमामि इदसे वप्रकारेण नमन्। नमप्रह्व
त्वे शब्दे चेति धातोर्बहुवारेन मः। आनंदन्। सहनूमान् रेमे। चिक्रीडे। रमु क्रीडायामिति धातोर्लिट् आत्मनेपदं रेमे रेमाते रेमिरे इति। भूयिष्ठं तेन मनुते इति
राज्याभिषेके वसिते तत्र सीताप्रेरणया नस्तां प्रजतो दिशोति। रामस्य राज्यमपि मंजुमाला व्याजेन दीपकिरणे बबंध। २२। हृतेन सौहार्द
हृता धिमौलि न्यस्तेन हस्तेन दयार्द्रदृष्ट्या। सेवाप्रसन्नो मृतकल्पवाचा दिदेश देवः सहभोगमस्मै। २३। प्रेष्ठो नरामस्य बभूव तस्मान्नरा
मराज्ये सुलभं च किंचित् तत्पादसेवारतिरेष नैषत्तथापि भोगाननुसाविरक्तिः। २४। श्रीगुरुभ्यो नमः। श्री वेदव्यासाय नमः। श्रीराम॥

स्थिदृस्ते नमस्त्रिवे नमस्त्वस्तु ष्टहे नमइत्यादिस्मृतिं मनसि निधाय नमः शब्दानां बहुवारोक्तिः कृतेति ज्ञातव्यं बहुवारोक्त्या नमस्कारस्य भगवत्प्रीतिसाधन
त्वं नमस्कारे तात्पर्यं च ज्ञायपत्तो। वपर्चरज्जवाक्त्तो। २५। किं वृषयामइति हे द्विप्रबद्धे हरीणां वा नराणां प्रबुद्धश्रेष्ठे। तत्रात्तस्मिन् हनुमति विषये। सीतापतेः सीतायाः
जानक्याः पतेः भर्तुः परमं उत्तमं प्रसादं प्रसन्नतां प्रसादस्तु प्रसन्नतेत्यमरः पूर्णानुग्रहमित्यर्थः। किं। किमिति वर्णयामः। रुवामः प्रसारोः हर्षेण तुष्य
मस्तमथ रिपर्थः। वर्णस्तुताविति धातोर्लट् परस्मैपदं वर्णयामि वर्णयावः वर्णयामः। कुतः यत् यस्मात् एष रामः स्वलोकं गंतुं महीं भूमिं क्ष्मां वनिमादि।

रु०१

मानमेवदत्तवान्। दानं दानमिमं तेन। लिट्परस्मैपदं। ददौ ददतुः ददुः। इति निष्केनरूपेण। न मौस्थितवानिति भावः। तस्मात् न वर्णयामि इति। इंद्रवज्रावृत्तं। २८। स्वानंदेति।
असौ हनुमान् इदानीं च अधुनापि एतर्हि संप्रतीदानीमधुना सांप्रतं तथेत्यमरः। किंपुरुषे। किंपुरुषाख्ये खंडे आस्ते वर्तते विलसति चकास्ति। वर्तते संभावयोः विलसे
इत्यमरः। अस उपवेशने इत्यस्मात् लट् आत्मनेपदं। आस्ते आसाते आसत इति। किं कुर्वन् सन्। भजतां सेवमानानां दिसे गां कुर्वतां जनानां स्वानंदहेतोः। स्वः स्वरूपभूत आ-
इत्यमरः। अ सुखं पवेशने इत्यस्मात् लट्। आस्ते। आसाते आसत इति। रामकथासुधां। रामस्यैव कथा चरित्रं च। यन्नित्तदेव सुधा अमृतं तस्यां सदा मग्नः आसक्तः सन् नृपतिं स्वामिनं स्वा-
सौ आनंदः सुखं स्वानंदः तस्य हेतोः प्रादुर्भावकारणं। रामकथासुधां। निरंतरं सेवमानः श्रीरूपमाप्यः सन्। २८। एवं प्रथमावतारं हनुमत्कृतां वर्णनं निवृत्तं। अथ द्वितीयावतारं भीमसेन
मीतु पश्यति इति समरः। श्रीरामं निषेव्यमाणः। निरंतरं सेवमानः श्रीरूपमाप्यः सन् सुधीः कोविदो बुध इत्यमरः। तस्य हनुमतो नाचतो पस्यनायोरेव द्वितीये हनुमत
भी नाम यिति। तस्यैव सादिना। स ततः बलिष्ठ महादिसु ताभिप्रायविदः। सन्तु सुधीः

श्रीराम ॥८॥ नमो नमो नाथ नमो नमस्ते नमो नमो राम नमो नमस्ते। पुनः पुनस्ते चरणारविंदं नमामि नाथेति नमन्नसेरेमे। २५। किं वर्णसि मत्परमं प्रसादं श्रीराम ॥८॥
सीतापतेस्तत्र हरिप्रवर्हो। मच्च न्महो नित्यनिषेवणार्थं स्वात्मानमेवैष ददौ यदस्मै। २६। स्वानंदहेतोर्भजतां जनानामानः सदा रामकथासुधा-
सु यां। असाविदानीं च निषेवमाणो रामं पतिं किंपुरुषे रमे। २७। तस्यैव नाथस्य वतारमेनं सत्तो द्वितीयं प्रवदंति भीमं। स्पृष्टैव यत्प्रीतिमनानिलेन नरें-
द्रकांता सुषुवे त्र कुंती। २८।

दपेक्षया द्वितीयं एनं अवतारं भीमसेननामकं प्रवदंति। आहुः। वद व्यक्तायां वाचि इत्यस्मात् लट् परस्मैपदं। वदति। वदतः। वदंति। एनं नरेंद्रकांता नरेंद्रस्य राज्ञः पांडो-
र्वनिता। कांता स्त्री। कामिनी ललना नारी तेजिघनं अयः। कुंती। तन्नाम्निका देवी प्रीतिमता। प्रीतिर्हर्षः। अस्यास्तीति प्रीतिमान् तेन। अनिलेन मुख्यवायुना।
स्पृष्टैव केवलं स्पर्शमात्र वती। न तु तेन क्रीडिता इति भावः। एवंभूता सती अत्र भुवि। यं सुतं सुषुवे प्रसूतवती एनमिति संबंधः। षुञ् प्राणिप्रसवे इत्यस्मात् लिट् आत्मनेप-
दी। सुषुवे सुषुवाते सुषुविरे इति। २८।

म०१। इंद्रायुधमितिप्राक्पूर्वं इंद्रायुधं इंद्रस्य आयुधं वज्रं इंद्रवतारिभिन्नुन्नं प्रेरितं इंद्रस्य करेण हस्तेन अतिसम्यक् नुन्नं क्षिप्रं प्रेरितमेव क्षिप्रेतावद्वज्रं रणोत्सु घ०१।
मरोत्तोः छिन्नाब्दोऽवधारयो। क्षितिधारिणां क्षितिं भूमिं धरंती तिष्ठंति धारिण्यः। पर्वताः स्त्रोषा। धरा धरित्री क्षोणी ज्या काश्यपी क्षितिरिति अमरोक्तेः
पक्षान् पतत्रापि गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमित्यमरः। चिच्छेद छिद्धातु कर्तरि लिट् छिद्वी करणे द्वैधीकरणे इत्यस्मात् लिट् परस्मैपदं। चिच्छेद। चिच्छिदतुः। चि
च्छिदुः। सभीमत्रोनः शार्दूलशयनं कपिशादिति शेषः। जननीकराग्रात् जनन्याः मातुः कुंत्याः जनयित्री प्रसूर्माता जननी इत्यमरः। कराग्रात्
करयोः अग्रात् प्रांतात् अग्रमंगालं वने प्रोतदितिचिह्नः। पन्नः पर्वतेपतितः सन् अंगसंगात् अंगस्य गात्रस्य संगात् संबंधात् अंगं गात्रमिति
कोपनेति विश्वः। भूभृद्वपुः। भुवं भूमिं बिभर्तीति भूभृत् पर्वतः। भूभृत् भूमिधरे नृपे इत्यमरः। तस्य शैलस्य पर्वतस्य वपुः शरीरं बिभेद विदारितवान् भिदन्त्विदा रणाइसत्ते

श्रीराम ॥१२॥

इंद्रायुधं हि द्रवतारिभिन्नुन्नं चिच्छेद पक्षान् क्षितिधारिणां प्राक्। बिभेद भूभृद्वपुरंगसंगाच्छिग्रसंपन्नो जननीकराग्रात्॥२९॥
पुरे कुमारानलसान्विहारान्निरीक्ष्य सर्वानपि मंदलीलः। कैशोरलीलाहृतसिंहसंघान्वने प्रवृत्तान् स्मरति स्म सूनुः॥३०॥

नो लिट् परस्मैपदं। बिभेद। बिभिदतुः बिभिदुरिति। बुद्धिपूर्वप्रयत्नेन द्रोणपर्वतः पिष्टं वज्रं पक्षमात्रं चिच्छेद अयं तु भीमः असावधानतया पर्वते पतितः सन् श्रीराम ॥१२॥
सर्वपर्वतशरीरं बिभेद। तस्मादेतच्चित्रं आश्चर्यं अनेन भीमः सदारस्य वज्रापेक्षम् अतिदार्ढ्यं। श्रीगुरुभ्यो नमः। श्री वेदव्यासाय नमः। श्रीरामः॥
मुक्तं भवति॥२९॥ पुर इति। स भीमः पुरे हस्तिनापुरे मंदलीलः मंदे शनैः लीला क्रीडा यस्य स मंदलीलो पि विहारात् क्रीडायाः अलसान् श्रमवतः स
र्वान् कुमारान् राजकुमारान् निरीक्ष्य दृष्ट्वा प्राक् पूर्वं च वने अरण्ये प्रवृत्तां जननकाले स्वेन कृतामिति य। वनचूहृतसिंहसंघा हृतः निहतः सिंहानां
मृगेंद्राणां संघः गणः यस्यां सा तथोक्ता। गुणौघसंघाते वारव्राते कुले हेतवः इतिहैमः। पुंधः। कैशोरलीलां गि। शोरस्य बालस्येयं कैशोरा। सा च सा लीला
च तां। बालः किशोरो वायस्थ्ये इत्यमरः। सूनुः। सुभद्रांशकंठायुक्तः। स॥

पूजायां भृशार्थे चेत्यमरः। स्मरति स्म अस्मरत्। स्मशब्दयोगे न लटः अतीतार्थकत्वं लट् स्मे इति सूत्रात्। स्मृ स्मरणे इत्यस्माल्लिट् परस्मैपदं। स्मरति स्मरतः
स्मरंति स्मरतः स्मरंति कुमारैः सह क्रीडापेक्षया सिंहैः सह क्रीडा समीचीना। ताः दृष्ट्वा क्रीडामेमचंद्रानुस्यादित्युत्कंठावान् अभूदिति भावः॥२०॥ भुक्तं
चेति। परिवेषिते दत्ते परिपंथिभिः शत्रुभिः दुर्योधनादिभिः। अभिसंधानि तिरारात्त्रिप्रसथ परिपंथिन इत्यमरः। दत्तं भुक्तं सद्भाराद्रोपितं विषं गरलं। विषमित्यमरः
निषमिस्रान्नमित्यर्थः भुक्तं च जलाननं भीमेन भुक्तं मपि च जीर्णं उदरस्थक्रमभूदिति भावः। अतः एतस्माद्भीमात् विषभृन्नप्याः विषं बिभ्रतीति विषभृतः सर्पाः
तेषां तेषां गणः समूहः विषयणाः विषादं प्राप्तः विनष्टदर्पः। सभीमः प्रमाणकोटेः प्रमाणकोट्याख्यव्यहरात् हेलया अवज्ञया तिरस्कारेणेति याचत् स्त्रीभा
वादवज्ञायां हेलेत्यमरः। अनायासेनेति भावः। आगत् आजगाम हि दुर्योधनादिभिर्बध्वा हृदे क्षिप्तोपि भीमः। बघनक्षेपयोश्चालक्षीवृत्तत्समीपृहदात्
तुनीर्य बहिरागत इति भावः॥२१॥ गम्लृ गतौ इत्यस्माल्लुङ् परस्मैपदं अगमत् अगमतां अगमन्निति। अगज्जीवनदे जगतां सकलजीवानां जीवनददातीति

श्रीराम ॥१॥

समर्प्य कृष्णानि कृतीकृतानि व्यासाय भूम्ने सुकृतानि तानि बहूनि। करिष्यमाणानि च तस्य पूजां संकल्पयामास स धर्मसूनुः॥२२॥
भुक्तं च जीर्णं परिपंथिदत्तं विषं पयो विषभृद्गणोतः। प्रमाणकोटेः स हि हेलयागाज्जगज्जीवनदेत्र चित्रं॥२१॥
दग्ध्वा पुरं योगबलात्स नियन्नूचमीनिव स्वान् सहजान् दधानः। आदारिभावेन जगत्सुपूज्यो योगीव नारायणमाससाद॥२२॥

जगज्जीवनदः तस्मिन् अत्र अस्मिन् भीमे इदं पूर्वोक्तं मरणाद्यघपरिहारपूर्वकं स्वजीवनं चित्रं न अस्मद्भीमे हीदं माश्चर्यमिति भावः॥२२॥ दग्ध्वेति।
योगबलात् योगस्य योपस्य बलात् सामर्थ्यात् योगः संनहनोपायध्यानसंगतियुक्तिष्वित्यमरः। पुरं लाक्षागृहं आगारे नगरे पुरमित्यमरः। दग्ध्वा
अस्मीवृत्ता नियन्नूबलान् निर्गमितान् स्वान् स्वकीयान् सहजान् भ्रातॄन् युधिष्ठिरादीन्। समानोदर्यसोदर्यसगर्भ्यसहजाः समा इत्यमरः। घमानिव पुण्या
नीवास्वाघमिति। स्त्रियं पुण्यश्रेयसी इत्यमरः। दधानः स्वस्कंधे वहन् आदारिभावेन आत्ति भक्षयति नरानिति अदो राक्षसः। हिडिंबः तस्यारिभवितः अ
रित्वं तेन जगत्सुपूज्यः मान्यः सभीमः श्रीनारायणं हिडिंबीं ग्राह्य पुत्रं जा विभूतिं श्रीवेदव्यासमासदात् प्राप्तवान्। ददर्शेति भावः। सद्लृ विशर
णगत्यवसादनेष्विति धातोर्लिट् परस्मैपदं। ससाद सेदतुः सेदुः। व इव योगीव। योगः गुणयोः॥

श्रीराम ॥१॥

भ० स्यादस्तीति योगी उपायेनानुगुरुः पुरुषश्चायथास्व। स्वामिद्वेषःवा स्यचिपुरुषस्य पुरुषस्य पुरुषं योगबलात्। कस्माच्छिद्रुपायबलानुदग्ध्वा निगृह्य ज०॥
नुत्तस्मापुरा ब्रह्मिषि न सहजाः। सहजार्थं इति सहजाः सहोत्पन्नाः तानुघमानु अदृष्टविशेषानुदधानः अदारिभावेनादारोदलनं शत्रुकृ
न्तबाधस्तो। स्यादस्तीति दारी दारीनभवनीति दारी। अदारिपोभावः अदारिभावः तेनरचयं कृतपराभवरहितोहोनभावः। जगत्सु पूज्यः सनूत्त्वा
तबाधस्तो। स्यादस्तीति दारी नभव निस्पदारी। अदारिपोभावः अदारिभावः तेनरचयं कृतपराभवरहितोहोनभावः। जगत्सु पूज्यः सनू
रवाप्तिं नं प्राप्नुय। नूत्नयेति भावः। पुनः कइव योगीव। योगः समाधिपरिपाक। सोऽस्यास्तीति योगी तपस्वी सर्थः तपस्वी सयमी योगी च योगीति
नेजयः। सइव सोपि प्राणायामेन विजितपवनहा नपुरं शरीरे योगबलात् योगस्य समाधिपरिपाकस्य बलात् दग्धस्व देहगतवन्हिनाभस्मीकृ
श्रीराम॥ परिनिर्यन् ब्रह्मनाडीमार्गेण देहाद्बहिरभ्युगच्छन् अशरीरभावेन दरोविदारण शरीरस्पर्शं न पवनाभ्यसकुर्वन्ति योगिनां पवनमार्गेसिचारे सति देहे शीघ्रमि
॥१०॥ भवतीति तत् अहितत्वे न जगत्सु स्वर्गादिषु उत्तमलोकेषु पूज्यः सन् घमनिमेस सुखाभिवृद्धिहेतून् पुण्यविशेषानुदधानः तान् अमुंचन् नाशयन् सर्विं
भूतपरमानंयथाआप्नुयु नूतयेति भावः॥२२॥ समर्प्येति निवृत्तीज्ञानी धीमान् सूरिः कृती कृषी समरः शुद्धबुद्धिः शुद्धभगवद्द्रप्रतिकूलाबुद्धिः जं

समर्प्य कृष्णानि वृत्ती वृत्तानि व्यासायभूम्ने सुकृतानि तावत्। वरिष्यमाणानि च तस्य पूजां संकल्पयामास शुद्धबुद्धिः॥२२॥ श्रीराम॥१०॥

नः वरपं यस्य सत्तथा। सभीमः। सुवृत्तानि। सुसम्यक् भगवत्पूजात्वेन कृतानि अनुष्ठितानि वृत्तानि स्वस्य चतुर्योग्यानि तावत् सकलानि सुभृ
तानि कर्माणि। अत्र वृत्तनाद्वः भावेनिष्ठांतः भूम्नेपरिपूर्णाय व्यासाय वेदव्यासाय समर्प्य वरिष्यमाणानि च तावत् सकलानि कर्माणि यावृत्तो
व वदुरुन् वाक्येप्यर्थः तस्य वेदव्यासस्य पूजां संकल्पयामास। संकल्पयां आमुपसर्गं तमव्ययं असभुवीमृतोलिटूपरस्मैपदं। आसा आसतुः
आसुरिति भवता आप्नुनिहिडं बनिग्रहानानि कर्माणि भगवत्ति समर्प्य अथ अग्रे वरिष्यमाणानि च ववनिग्रहादीनि कर्माणि भगवत्पूजात्वेन वरिष्य
मीति संकल्पयामासेति भावः। अत एव शुद्धबुद्धिश्चेति भावः॥२२॥

म.ध्व. विष्णोरिति। अथ वेदव्यासदर्शनानन्तरं ससोदरः। सोदरैः भ्रातृभिः सहितः ससोदरः सभीमः राजकन्या। राज्ञः द्रुपदराजस्य कन्या पुत्री। प.स.
अदित आदत्त। आप्यायितेन स्वीकृतवान् निनिश्चाच। डुदाञ् दाने इत्यस्य लुङ्। आत्मनेपदं आदित आदिवान्। आदिशत्तेति कथंभूतः भीमा विष्णोः
पदधिश्रितः विष्णोः श्रीकृष्णस्य पदं अधिश्रितः आश्रितः। पुनः कथंभूतः बकसन्निरासी बकस्य राक्षसस्य सन्निरासो हननं अस्यास्तीति ब
कसन्निराशासी। पुनः कीदृशः क्षिप्तान्यपक्षिप्रकरः अन्यः स्वविपक्षाः विरुद्धः पक्षः सिद्धान्तः तेषां समस्तीति अन्यपक्षिणः जरासंधा
दयः। तत्त्वचः तेषां प्रकरः पूगः। अन्यपक्षिप्रकरो येन सः तथोक्तः पूगे। विताने प्रकर इत्यमरः। सुपक्षः शोभनः पक्षः सिद्धान्तो यस्य सः त
थोक्तः। कः कामिव। राजहंसः। राजहंसास्तु ते चंचुचरणैः लोहितैः सिताः इत्यमरः काव्यलक्ष्यपोक्तपक्षिविशेषः। हंसीमिव वि
ष्णोः पदं आश्रितः विष्णोः पदं विष्णुपदं आकाशं अधिश्रितः आश्रितः। बकसन्निरासी बकस्य तन्नामकपक्षिविशेषस्य सन्निरासो निराक
करणं अस्यास्तीति बकसन्निरासी क्षिप्तान्यपक्षिप्रकरः अन्ये स्वेतरे काकोलूकादयः ते च ते पक्षिणः खगाः तेषां प्रकरः क्षिप्तः अन्य

विष्णोः पदश्रितः बकसन्निरासी क्षिप्तान्यपक्षिप्रकरः सुपक्षः। ससोदर्याप्यदित राजहंसः सरा हंसीमिव राजकन्या॥२०॥

पक्षिप्रकरो येन सः तथोक्तः सुपक्षः। शोभनौ पक्षौ यस्य सः तथोक्तः॥२०॥ इंदीवरेति। इंदीवरश्रीजयिसुंदराभः इंदिरौ चेस्य नीलोत्पल
स्य श्रीः कांतिः इंदीवरश्रीः इंदीवरस्य जयो अस्यास्तीति इंदीवरश्रीजयिनी सुंदरा मनोहरा च सा आभा कांतिश्च सुंदराभा इंदीवरश्री
जयिनी सुंदराभा यस्य सः तथोक्तः तेन नीलोत्पलापेक्षयातिशायित मनोहररमणीयनीलकांतिमता इत्यर्थः। स्मेराननेन्दुः स्मेरं मंदहा
स्ययुक्तं च तत् आननं मुखं च स्मेराननं तदेव इंदुः चंद्र इव यस्य सः तथोक्तः स्वमातुलेयं। मातुलः पितृभ्राता॥ मातुलभ्रातृमातु
लेत्यमरः। स्वस्य मा॥

कुलः स्वमातुलः तस्यापत्यं पुमान् स्वमातुलेयः। स्वमातुलपुत्र इत्यर्थः। कमलायताक्षं कमलवत् कमलपत्रवत् आयते विशाले अक्षिणी यस्य स
तथोक्तः। तं दयितं प्रियं मुकुंदं श्रीकृष्णं सुचिराय बहुकालात् द्रौपदीस्वयंवरे दृष्ट्वा समभ्यनंदत् प्रसंतुतोषाहर्षितोभव तिपुराबहिर्गमनानंतरं ब
हुकालादृष्टं श्रीकृष्णं द्रौपदीस्वयंवरे दृष्ट्वा संतुतोषेति भावः। टुनदि समृद्धौ वित्तो लङ् परस्मैपदं। अनंदत् अनंदत् अनंदत्। ३५। महागद
मिति। वीरः आरब्धो नगामी भीमः राजानं युधिष्ठिरं अमुज्ज्वलराजसूयकं उज्ज्वलः अयंतप्रकाशमानः राजसूयः तन्नामकयज्ञः यस्य स तथो
क्तः तं च कार। किं कृत्वा महागदं महती गदा तन्नामकायुधं यस्य स तथोक्तः तं पृथिव्यां भूमौ चउरथ्यां चउः तीक्ष्णो रथ युधं यस्य स तथोक्तः तं वाउरथं
कः तं च कार। किं कृत्वा महागदं महती गदा तन्नामकायुधं यस्य स तथोक्तः पृथिव्यां भूमौ क्षुधि मक्षणुच इति अमरः। निरस्य दृष्ट्वा पुनः किं कृत्वा
बृहद्रथस्य गोविंदसुरेंद्रजौ चताभ्यां सहयोगे तृतीया ताभ्यां सह गत्वेति भावः। मंक्षु शीघ्रे द्राक् मंक्षु च इत्यमरः। निरस्य दृष्ट्वा पुनः किं कृत्वा
महागदं महांतः अद्रयः क्षितेः अगाः पर्वताः श्च वृक्षाः श्च महागदाः शैलवृक्षेन गानगविद्यमरः तानूपधनिरवेउयतीति महागदः तेऽस्वरवेउनश्नीधनोः॥

इंदीवरश्रीजयिसंदरात्मस्मेरानने नेंदुदयत्तं मुकुंदं। स्वमातुलेयं कमलायताक्षं समभ्यनंदत् सुचिराय भीमः। ३५। श्रीगुरुभ्यो नमः

महागदं चउरथं पृथिव्यां बार्हद्रथं मंक्षु निरस्य वीरः। राजानमुज्ज्वलराजसूयं चकार गोविंदसुरेंद्रजाभ्यां। ३६। श्रीरामः।

श्रीराम ११९॥

महापर्वतविदारणासमर्थमित्यर्थः। बार्हद्रथं बृहंतः महांतः श्वेतरथाः अस्य बृहद्रथः बृहद्रथानां संबंधी बार्हद्रथः बहुरथोपेतमित्यर्थः। एकचक्र
यां स्थितौ नोक्रूराणां कीचकादीनां रणायुधं निरस्य दिग्विजयकाले वा वन्कीचकादीनू विजितेति भावः। भीमः कृष्णार्जुनियुक्तः सन् जरासं
धं प्रतिगत्वा तं हत्वा दिग्विजयकाले कीचकादीनु विजित्वा धर्मराजेन राजसूयय यागं कृत्वा मासेति भावः। ३६। स भीमः शासनेन दुर्यो
धनानुजेन आकुंचितानू घूतकाले वेशेषु गृहीत्वा आकर्षितान् विकीर्णानू सूक्ष्मानू मृदूनू अरालानू वक्रानू अग्नितानू नीलानू॥
कृष्णानू निसितेत्यमरः। प्रियायाः भार्यायाः द्रौपद्याः केशानू सिरोरुहानू। कचः केशः सिरोरुहेत्यमरः। श्रीरामचंद्राय नमः। ३७।

श्रीराम ११९॥

वैरिजनस्य वैरिणः शत्रुभूतजनस्य दुर्योधनादेः जिघांसया हंतुमिच्छया पश्चात् हनिष्यामीति बुध्येत्यर्थः। संचिकाय चिकाय चि
म०॥ वैरिजयस्य वैरिणः शत्रुभूतजनस्य दुर्योधनादेः सूक्ष्मादिविशेषणयुक्तान् दुःशासनेन सर्पविषये दृष्टं क्रूरं दृश
क्यतु चित्यनु इति। कइवा तीक्ष्णान् क्रूरान् के इव कृष्णसर्पानिव। निपुणः पुरुषः सूक्ष्मादिविशेषणयुक्तान् दुःशासनेन सर्पविषये दृष्टं क्रूरं दृश
सनेन मंत्रौषधिरूपनिक्षयस्य सत्त्वे थोकेः नेनान्येन गरुडमंत्रेण जिह्मेन आकुलितान् पीडितान् द्विरिस्थितान् विद्रावितान् कृष्णसर्पान् वैरिज
न स्य जिघांसया यथा स्वकीयादिपंजरादिस्था नेपुष्टकीकायति तु तद्धितिर्भावः। वैरिजिघांसयेत्येन नयेथा कृष्णसर्पविनाय यथा वैरिहनने
न स्य जिघांसया यथा स्वकीयादिपंजरादिस्था ने निमित्तत्व मुक्तं भवति। तत्तश्च तदेकीकरणं युक्तमेवेति भावः। ७०। जाज्वल्यमानस्येति। पुंसा पुरुषा
मित्तत्वेन दुःशासनेन कृष्टकेशानां वैरिहननेनिमित्तत्वमुक्तं भवति। सहानि जंतवः स त्वमस्त्रीतु जंतुविस्मरः। विभीरादिरोक्षसः सिंहव्याघ्रादयस्थेत्यर्थः॥
णां भयदानि भयं ददतीति भयदानि। भयंकराणीत्यर्थः। सत्त्वानि जंतवः। गुरुणा महता तेजसा प्रभावेण गुरुतेजः महासामर्थ्यमिति यावत्। तेनात्तेजः प्रभावेदि
वृकोदराग्नेः वृकोदरः भीमः अग्निरिव तस्य। गुरुतेजसा। गुरु महत्त्वं तत्तेजः प्रभावश्च गुरुतेजः महासामर्थ्यमिति यावत्। तेनात्तेजः प्रभावेदि
वृकोदराग्नेः वृकोदरः भीमः अग्निरिव तस्य आपुः प्रापुः आप्लृ व्याप्तौ विलिसमाच्छिट् परस्मैपदं आप आपातुः आपुरिति। वायंभूतस्य वृकोदराग्नेः अरण्यवासकाले
सेवेस्मरः नाशं मरणं आपुः प्रापुः आप्लृ व्याप्ता

दुःशासनेनाकुलितात् प्रियायाः सूक्ष्मान् अरालान् असितान् तीक्ष्णकेशान्। जिघांसया वैरिजनस्य तीक्ष्णान् स कृष्णसर्पानिव संचि
काय। ७०। जाज्वल्यमानस्य वने वने लं दीर्घक्षतः पार्थिवसार्थमुग्रः। सत्त्वानि पुंसो भयदानि नाशं च कोदराग्नेर्गुरुतेजसापुः ॥८०॥

वने वने वीप्सायां द्विर्वचनं इदं सर्वस्मिन्नरण्ये इत्यर्थः। जाज्वल्यमानस्य। अतिशयेन ज्वलितः प्रकाशमानः जाज्वल्यमानः तस्य। पुनः कथंभूतस्य
उग्रं क्रूरं अनूभारभूतमित्यर्थः। पार्थिवसार्थं पार्थिवानां राज्ञां सार्थं राजि राट् पार्थिवः क्ष्माभृदिति अमरः। सार्थः समूहः। सार्थो वणिक्समूहे स्यादपि संघा
नमात्रके इति विश्वः। अलमत्यर्थं निःशेषमिति यावत्। दीर्घक्षतः दग्धुमिच्छतः भविष्यद्युद्धे दुर्योधनादि राजहननेच्छया तद्युद्धं प्रतीक्ष्यमाणस्य
तिभावः। यथोग्रवो कोधात् कर्तेन स्वरूपमत्र वर्णं पार्थिवेन॥

श्रीराम
।।१२।।

र्थैः पृथिव्यामुत्पन्नाः पार्थिवाः तेषां स्वार्थं अनलेन दह्यमानतः वने वने प्रज्वलतः दावाग्नेर्गुहिजसामहाज्वालमायुंसां भयंकरस्यापि सिंहव्याघ्रसर्पवृ
श्चिकादीनि सत्त्वानि न स्युः तद्वदितिश्लेषाभिप्रायः ।।२८।। भोगेनितरां सौभिस्तः भोगाधिका भोगवन्तः भोगा अपेक्षितविषयजन्यसुखानि तै
रधिकाः अतिशये न विषयासक्ता इति भावः अभोगः परिपूर्णता येषामस्तीति अभोगतः बलादिपूर्णा इत्यर्थः अभोगः परिपूर्णतेत्यमरः भो
गाधिकाश्च ते अभोगवन्तश्च भोगाधिकाभोगवन्तः तान् भोगाधिकाभोगवतः विशेषसमासोयं अरुणाक्षान् अरुणयोस्वभोचतः क्रोधनरके
अक्षिणी येषां ते अरुणाक्षाः तान् घरेंद्रान् घराः पर्वताः आहार्यधरपर्वता इत्यमरः तेषामिंद्रश्रेष्ठे गोघमानगिरोइत्तस्तनतः सर्वत्रेत्यर्थः स्वैच
लचूर्द्धवे जेंद्रान् जिह्वान् द्विजिह्वभाषिते न द्विविचे जिह्वे रसने येषां ते द्विजिह्वाः महसरेणानृतभाषिनरइत्यर्थः तान् रसज्ञा रसना जिह्वेत्यमरः घृदून्मना
चावूमकिस्तीक्ष्णानू कटुः सुगंधेतीक्ष्योस्यादिति विश्वः मणिमत्पुरोगान् मणिमान् तन्नामकः सुरः पुरोगः अग्रेसरः श्रेष्ठं तं मणिमत्पुरोगः तान्

श्रीराम
।।१२।।

भोगाधिकाभोगवतोरुणाक्षानितस्ततः स्वैचलतो घरेंद्रे। बहून्द्विजिह्वान्मणिमत्पुरोगानसौ कद्रून्क्रोधवशाञ्जघान।।२९।।

पुरोगोग्रेसरः प्रष्ठाग्रतः सरपुरः सरा इत्यमरः बहून् क्रोधवशान् क्रोधवशाख्यान सुरान् जघान हत्तवान् हनर्हिंसागत्योरस्माल्लिट् परस्मैपदं।
जघान जघ्नतुः जघ्नुः असौ दावाग्निर्यथा बहून् क्रोधवशान् क्रोधस्य कोपस्य वशान् अधीनान् क्रोधपरिपूर्णा इत्यर्थः भोगाधिकाभोगवतः
भोगैः शरीरैः पूर्यैरिति वा अधिकान् दीर्घदेहान् बहुफणान्वा भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः आभोगवतः बलादिपूर्णा
नूअरुणाक्षान् घरेंद्रे कस्मींश्चिद्गिरिवरे इतस्ततः स्वैचलतः मणिमत्पुरोगान् मणिरेषामस्तीति मणिमंतः तेवा च नपणेषु मणिमंतश्चइत्यर्थः मणि
मंत एव पुरोगोः प्रधानाः एषां ते तथोक्ता स्तान् कटून् विषदंष्ट्रादिनाक्रूरान् द्विजिह्वान् द्वे जिह्वे रसने एषां ते द्विजिह्वाः सर्पास्तान् ।।२९।।

लेलिहानो द्विरसनेति सर्पपर्यायामरः ॥ नारायेत्न तथा भीमो ऽसुरान्लधानेति भावः ॥ ७६ ॥ अथेति ॥ अथ वनवाससमाप्त्यनंतरं ॥ वायुप्रभवः ॥ वायो
मुख्यप्राणात् प्रभवतीति वायुप्रभवः ॥ वायुपुत्रः एषः भीमः अज्ञातवासे वेषांतरभस्मलीनः अन्यो वेषः वेषांतरं सूदनामकं तद्देव भस्मत्तेन लीनः
निगूढः आच्छादित इति यावत् भीम इति केनाप्यविदित इति भावः ॥ क्रमेण सुतेजाः सुष्ठु अभिव्यक्तं तेजः प्रभावो यस्य स सुतेजाः एतादृशः स नूरुद्धाखिल
नीरुद्धाः प्रतिरुद्धाः अखिलानां राज्ञां आशाः विजयाभिलाषाः येन स तथोक्तः षडुत्तरशतकीचकानां अतिप्रबलत्वात् द्विजयाभिलाषा कस्यापि राज्ञो ना
भूदिति भावः ॥ मुखरं अविचारितभाषिणं प्रचंडं अतिक्रूरं अखिलकीचकौघं अखिलाः षडुत्तरशतसंख्याकाश्च ते कीचकाश्च तन्नामकराज्ञश्च अ
खिलकीचकाः तेषामोघं समूहं ओघः समूहे निवहे इति भास्करः ॥ भस्मीचकार ददाह ॥ यथा अग्निर्भस्मनि लीनः स नूत्क्रमेण वायुप्रभवः ॥ वायुनो
द्बोधितः अत एव सुतेजाः रुद्धाखिल ॥ रुद्धं खमंतरं प्रतिरुद्धं आक्रांतं अखिलं आशाः दिशो येन स च तथोक्तः आशा दिगभिलाषयोरिति भास्करः ॥
श्री॥ अथैष वेषांतरभस्मलीनः क्रमेण वायुप्रभवः सुतेजाः ॥ रुद्धाखिलाशं मुखरं प्रचंडं भस्मीचकाराखिलकीचकौघं ॥ ७० ॥ श्रीवेदव्यासाय
स कृष्णवर्मा विजये नयुक्तो मुहुर्महाहेतिधरोप्रधृष्यः ॥ भीष्मद्विजाद्यैरतिभीषणाभैर्वियक्षवक्षं क्षपयन्विरेजे ॥ ७१ ॥ श्रीगुरुभ्यो नमः श्रीरामाय
मुखरं वायुवशात् संशब्दं प्रचंडवीरकात्मकत्वात् क्रूरतरं अखिलकीचकौघं अखिलाश्च ते कीचकाश्च तेषामोघं समूहं भस्मीचकार ददाहेति भा
वः ॥ वेणवः कीचकास्ते स्युर्ये स्वनंत्यनिलोद्धताः इत्यमरः ॥ ७० ॥ कृष्णवर्मा ॥ कृष्णस्य वसुदेवपुत्रस्य वर्ममार्गो यस्य स तथोक्तः कृष्णाज्ञापित
मार्गस्थ इत्यर्थः अयनं वर्ममार्गाध्वा इत्यमरः ॥ विजये नयुक्तः महाहेतिधरः महं सश्चत्ताः हेतयः अस्त्राणि च महाहेतयः ॥ धरतीति धरः महाहेतीनां ध
रः महाहेतिधरः रवेरर्चिश्च शस्त्रं च वह्निज्वाला च हेतय इत्यमरः अप्रधृष्यः अपरैरतिनाश्यः सभीः भीष्मद्विजाद्यैः भीष्मो गांगेयश्च द्विजा द्रो
णाश्वत्थामादयश्च भीष्मद्विजा एव आद्याः पूर्वे येषां ते तथोक्ताः तैः राजसमूहैः अतिभीषणाभैः अतिभीषणा अत्युग्रं भयंकरा आभा कांतिर्येषां

भीषणाऽमतभयंकराभा कान्तिर्यस्य स तथोक्तस्तं । विपक्षवक्षांसि विपक्षाः दुर्योधनादिद्वेषिण एव वक्षःसु शुष्कारण्ये विपक्षकक्षं तं द्विड्विपक्षा
हितारिरित्यमरः ॥ सोऽभ्यच नृपे कक्षः शुष्ककाननवीरुधोः इति विश्वः ॥ मुहुर्भृशं क्षपयन् संहरन् विरेजे व्याजलदीपावि ॥ स्माल्लिडालने पदं रेजे रेजाते
रेजिरे इत्ति ॥ विजयेन । चित्रिः उज्जयेन युक्तः महाहेतिघरः महती ना मणिवृक्षानां हेतीनां ज्वालानां घरो धारकः अप्रघृष्यः सोऽदमरः स्यः वृक्षानलमऽ
ग्निः ॥ बर्हिः शुष्मा कृष्णवर्त्मेति अग्निपर्याये अमरः ॥ भीष्माद्द्विजाघैः भीष्माः भयंकराश्च ते द्विजाः पक्षिणश्च त एव आद्याः पूर्वे येषां ते तथोक्तैः व्याघ्रादयस्तैः ।
भीमस्तु भीषणो रुद्रे गांगेये च निशाचरे इति विश्वः ॥ दंतविप्रांडजा द्विजाः इत्यमरः ॥ अति भीषणाभं अतिभयंकराकारे कक्षे वने क्षपयन् यथा विरेजे तथे
तिभाचय ॥ बहुहेतिलीलाः ॥ बहवश्च ता हेतयश्च आयुधानि बहुहेतयः बहुहेति भिल्लि ॥ क्रीडा यस्य स तथोक्तः स भीमसेनः तरस्विनः शूरान् ।
चिरा शूरौ नरस्विना इत्यमरः ॥ प्रोच्चलितान् प्रचलितान् स्वधर्ममार्गादपगतान् अधीरान् धैर्यरहितान् निर्दग्धपक्षान् निहताः पक्षाः सहायभूता जेनोर

तरस्विनः प्रोच्चलितान धीरान्निर्दग्धपक्षानति तीक्ष्णकोपान् ॥ स धार्तराष्ट्रान्बहुहेतिलीला विनाश्य विश्वान्परया श्रिया भातु ॥४७॥

षां ते निर्दग्धपक्षाः तान् । पक्षः सहाय गुरुदेति कुसाध्यमेति मित्रेषु चिह्ने विवरे नृपवुंजरे चेति रत्नमाल अतीतीक्ष्णकोपान् अत्यंतं तीक्ष्णः तिग्मः
कोपः क्रोधः येषां ते तथोक्ताः तान् ॥ तिग्मे तीक्ष्णं खरं तद्वदित्यमरः ॥ धार्तराष्ट्रान् धृतराष्ट्रस्यापत्यानि पुंमांसे धार्तराष्ट्राः दुर्योधनादयः । तान् विश्वान्स
र्वान् अपि । विश्वमशेषं कृत्स्नं चेत्यमरः ॥ विनाश्य हत्वा परया उत्तमया । परस्योत्तमत्वानन्यसमरः ॥ श्रीः राज्यसंपद् । संपत्तिः श्रीश्च लक्ष्मीश्चेत्यम
रः अभात् अशोभत ॥ भादीप्तौ इत्यस्मात् लङ् परस्मैपदे अभात् अभातां अभुः इति । यथा वन्हिः अग्निः नरस्विनः वेगिनः प्रोच्चलितान् रचनीज उन्निष्ट
नानुच्चलितानुपधीरान्

श्रीराम ॥१२॥

अग्निमप्रदेशमनिलं॑ष्यरतुं धैर्यरहितान् अतएव निर्दग्धपक्षान् नि। नदग्धाः पक्षाः पत्राणि येषां निर्दग्धपक्षाः तान् अतीतीक्ष्णकोपान् धार्त्तराष्ट्रा
न् तन्नामकपक्षिविशेषान् राजहंसास्तु तेच चुचरणैर्लोहितैः सिताः। श्यामलैर्मल्लिकाक्षास्ते धार्त्तराष्ट्राः सितेतरैरित्यमरः। विश्वान् नहुहेति लीलः
स नुबर्हीभिः हेतिभिः दधन्वा लाभिः लीलाहनन् नृपात्रीडायस्य सतथोक्तः तादृशः स नृपरयाश्रिया कौरवं शोभत चकास्ति श्लेषाभिप्रायः॥७२॥
कृत्स्नेतिकृष्णांघ्रिपंकेरुहभृंगराजः। कृष्णस्य वसुदेवपुत्रस्य अंघ्रीच्चरणौ पंकेरुहे च कमले इव। पंकेरुहं तामरसमित्यमरः। तयोः भृंगराजः भृंग
यो भ्रमराणां राजाश्रेष्ठः। द्विरेफः पुष्पलिट्भृंगः षट्पद भ्रमरालय इत्यमरः। कृष्णामुखांभोरुहहंसराजः। कृष्णायाः द्रौपद्याः मुखं आननं अं
भोरुहं कमलमिव कृष्णामुखांभोरुहं चस्मिन् हंसराज इव हंसपक्षिश्रेष्ठ इव। स्थिनः हंसास्तु विश्वेतगरुत च विश्वः कृष्णा तु द्रौपदी नीलीचुवि

कृष्णांघ्रिपंकेरुहभृंगराजः कृष्णामुखांभोरुहहंसराजः। राजा सरोजावलिरश्मिराजः ससोदरो राजत वीरराजः॥७३॥

श्वः। प्रजासरोजावलिरश्मिराजः। प्रजाः स्वकीयजनाः प्रजाः स्यात्संततौ जनाइत्यमरः। ता एव सरोजानि कमलानि तेषां आवलिः पङ्क्तिः समूह इत्यर्थः
त स्याः रश्मिराजः रश्मिभिः किरणैः राजत इति रश्मिराजः सूर्यस्थानीय इत्यर्थः। किरणः प्रग्रहो रश्मिरित्यमरः। ससोदरः। सोदरैः भ्रातृभिः सहव
र्तमानः। वीरराजः वीराणां शूराणां राजाश्रेष्ठः अराजत शुशुभे। राजृ दीप्तौ इत्यस्मात् लङ् प्रथमैकवचने पदं अराजत अराजेतां अराजंत। श्रीकृष्णपा
व्याजेन साक्षान्मुख्यंतः विशिष्टं पुरुषार्थं लेभे अहो आश्चर्यं अस्य महिमेति विशिष्टपुरुषार्थस्वमोक्षएव सर्वपुरुषार्थानमइत्यर्थः॥

इति श्री विष्णुसुत त्रिनिषयि भगवन्माहात्म्या पर्यायवचने ।।५०।। वासुदेवामिति । जनः सुजनः इह भुवि वर्त्तमाने वसुदेवतो सकृते प्रापादेवता
पाः अंशभूत विविधलीलं नानाविध बाल्यक्रीडोपत्तं वासुदेवसन्नामकं वासुदेवइत्यन्वर्थनामकं बाल्ये अजिनन्नेदं स्फुरद्देवश्च सेवनं
षो वंइव वासुदेवं वसुदेवसुतं यः श्री कृष्णनामानं आवदत्ता वमिव वा विकल्पोपमानयेति समरः ।।५१।। इतीति विष्णुदास गूढ पिता
ना विभूत स्वसामर्थ्ये पिइह विहरति क्रीडमनिसत्ति सुजनानां चित्तं मनः आनंदपूर्वं सिमज्जनि जातो भानौ सूर्ये घनमाला लीनभानो मेप

श्रीराम ।।१२।।

वासुदेवमिह वासुदेवतासत्कलाम भिजिननं दत्तो जनः ।। वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकं ।।५०।।
इति विहरति मर्त्यं विष्णुदासे पिगूढे समज्जनि सुजनानां चित्तमानंदपूर्वं ।। उदयति घनमाला लीनभानो चेभानोन
नुजनेन नयनाब्जैर्लभ्यते नैव विकासः ।।५१।। ।। इति श्रीमध्वविजये महाकाव्ये नारायणपंडिताचार्य विरचिते द्वितीयः सर्गः ।।२
श्रीमध्वोत्तगत्ते श्री कृष्णार्पणमस्तु ।। श्रीहनुम श्रीमन् मध्वोत्तरगत्ति राम कृष्ण वेदव्यासात्मक मोक्षप्रदाने तन्नूपा
त्मक श्री वासुदेवः प्रीयतामनेन ।। श्री कृष्णार्पणमस्तु ।।

श्रीराम ।।१२।।

माला सुलीनदीधितेर्भानुः सूर्ये मरीचि स्वीयुयोगे दीधिति स्त्रियामित्यमरः उदयति सति जन नयनाब्जैः जनानां नयनैः अ
लैर्विकासः उन्मीलनं न लभ्यते नन्नु ।।५१।। ।।५५।। ।। श्रीमध्वोत्तरगत्ते श्री कृष्णार्पणमस्तु ।।५५।। इति श्रीमध्वविजयपरीकार्यो द्विती
यः सर्गः समाप्तः ।। श्री कृष्णार्पणमस्तु ।।५५।। श्रीमध्वविजयस्यास्य प्रीत्ये श्री रामध्वयोः द्वितीयो लिखितः सर्गो मध्वेनानं
तसूनुना ।। २ ।।

॥ श्रीमध्वविजयश्चतुर्थिसर्गप्रारंभ॥

म०१।

श्रीवेदव्यासायनमः हरिःॐ। अथेति। अथ श्वशुरकुलवाससमाप्त्यनंतरं विशारदः विदग्धः एषः वसुदेवः सल्लोकदया सुधार्द्रया। संतश्च
ते लोकाः सज्जनाः। अथ सल्लोकाः। लोकस्तु भुवने जने इत्यमरः। सल्लोकेषु दया सल्लोकदया सैव सुधा अमृतं सल्लोकदयासुधा यया आर्द्रया
क्लिन्नया सदागमस्तेननिरासकामया स्तेनः निर्दोषाः श्रुतेः आगमाः वेदादिस्तान् अपि चरन्ति तेषां स्तेनः तस्करः चोरकामादिकः स्तेनदस्युतस्क
रमोषकाः इत्यमरः। तस्य निरासे कामः इच्छा यस्यास्तथोक्ता तया रमावरावासभुवा रमायाः लक्ष्म्याः वरः उत्तमः हरिः तस्यावासस्य।

श्रीराम ।।१२।।

हरिःॐ। अथैष सल्लोकदयासुधार्द्रया सदागमस्तेननिरासकामया। रमावरावासभुवा विशारदो विशालया
चिंतयदात्मनो धिया।।१।।

भूस्थाने श्रीहरिः सर्वदा तद्धृदये तिष्ठतीति भावः। तया एवंभूतया विशालया महत्या। विशालं पृथुलं महदित्यमरः। बहुविषयीकारिणी
त्यावत्। आत्मनः स्वस्य धिया अंतःकरणेन अचिंतयत्। विचारं कृतवान्। चितिस्मृत्या विद्यते नोलट् परस्मैपदे। अचिंतयत् अचिंतयत् अ
चिंतयत्। सर्गसमाप्तिपर्यंतं प्रायः वंशस्थबिलं वृत्तं वदंती वंशस्थविवृत्तं जरौ विति लक्षणात्।।१।। श्रीगुरुभ्यो नमः।। श्रीवेदव्यासायनमः।।

उ०१।

श्रीराम ।।१२।।

क्रियारप्रकारमेवविवृणोति जन नन्येति यस्मात् यस्मात् अनन्यसंगात् अन्यस्मिन् भगवदितर विषये संगः आसक्तिः अन्यसंगो विषय
भोगः इति यावत् अनन्यसंगस्याभावः अनन्यसंगः विषयासक्त्यभाव इत्यर्थः तस्मात् हरेः नारायणगुणेषु जगद्धितत्वादिषु संगिता आ
सक्तिः घट इति शेषः विषयवैराग्ये सत्येव हरिमहिमश्रवणमननादौ आदरो युज्यते नान्यथेति भावः जनस्य विशिष्टचेष्टितेन तु विशिष्टा
नां उत्तमानां चेष्टितेन तु कर्मानुष्ठानमेव तु स्याद्धि इत्येवं धारणे इति मतः मानं प्रमाणं भवति सर्वे जनाः शिष्टाचारमेव प्रमाणीकृत्य कर्मा
नुष्ठाने प्रवर्त्तन्ते इति भावः यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जन इत्युक्तेः अस्मात् शिष्टाचारस्य प्रमाणत्वात् अहं पारमहंस्यस्य परमहंस्यानीय
तीनी संबंधी पारमहंस्यः तं आश्रमं जानन् स्वीकुर्वन् सन् लिंगं मम स्वभावभूतं असंगं विषयसक्त्यभावं प्रकटीकरोमि सर्वेषां जनानां

अनन्यसंगाद्गुणसंगिता हरेर्जनेस्य मानं च विशिष्टचेष्टितं। असंगमस्मात्प्रकटीकरोम्यहं निजं भजन् पारमहंस्यमा
श्रमे ॥२॥ मम प्रभो न परिथ हिंशो जन्तेर्द्विषस्तु विष्णुपदं तु धारणं। हरिस्वसान्न्यधिनादसद्विदे भवेदतो नास्मि च दंड
धारकः ॥३॥

प्रत्ययिष्यि प्रकटीकरोमीति विविच्यं स्पष्टयति ममत्य यसक्त्यभावे सत्येव हि हरिमहिम्नः श्रवणादौ आसक्तिर्घटते नान्यथा मम तु विषयास
क्त्यभावः स्वभाव एव किं तु विशिष्टाचारमेव प्रमाणीकृत्य सत्कर्मानुष्ठाने प्रवर्त्तमानानां विषयवैराग्यप्रदर्शयितुं यसाश्रमः स्वी च विष्य
ते इति भावः ॥२॥ यद्यप्याश्रमस्वीकारे निमित्तान्तरमाह ममेति अपरथा यद्याश्रमस्वीकाराभावे हे प्रभो भगवद्बुद्धिशिक्षणे समर्थस्य
मम विष्णुद्विषस्तु मायावादिप्रभृति प्रयत्नं अदंडधारणे दंडस्य जिक्राप्येद नृपस्य शिक्षणा स्याद्दंडः स्वीकारा सुनेरा शहिं सायां नगु
डायां चेति वैजंती अधारणे अकरणे न शोभते न युज्यते तदिष्टक्रियमाद्विषिणा शिक्षणं इत्यत आह हरिरेव सेतिय यस्मात्कारणात्

अचिरात्सीत्र भवेत्त अवतरिष्यति। ननु अतः विष्णुद्वेषि दुःस्य दुर्गतिर्भविष्यमाया ... अहमपि दुःखधारकः दुःस्य कर्त्ता। अस्मिन्नम
वामि। अयं भावः श्रीहरिद्वेषिणां देहादि दुःखनकार्यमिवतदपि श्रीअमेव दुर्गया करिष्यति तया करिष्यमाणां शिक्षणामयाइदानीं नकार्यमेवास
मर्थेन दुःखधारणायोग्या अमधियते नमया शिक्षामकृतानस्यातव्यं प्रभुवाय प्राप्ते। अतः दुःखधारणायोग्यप्रभवायानायादर्श स्याप्रम
स्त्रीव रिष्यतीति अवितयत्तेनिपूर्वणान्वयः। ३। विश्वं त्वयन्निति अनन्तचिंतकः अनन्तस्य भगवतो हे चिंतकः सदा ध्यानकर्ता अस्रौ वासुदे
व। इत्यपूर्वेति प्रकारेणास्मिंस्त्वयि नू सन् अपश्च अनंतरं समस्तसंन्यासनिबंधनिश्चयः समस्तस्य गृहक्षेत्रादेः संन्यसे परित्यागे निबंधः नि
र्वंधः इत्यपूर्वेति यावत् निश्चयः निर्णयो निश्चयो यस्य सततयोक्तः सन् अनुज्ञा यदि हरेरनुज्ञां स्वीकुर्तुः समस्तसव्यापिने समस्तसर्वस्मिन् जग
नूः दूरः इति यावत्। निश्चयः निर्णयो निश्चयो यस्य ... समस्तव्यापिने आत्मप्रदाय। असनः स्वस्य दायोक्षेत्रादेर्गच्छति वित्त इति आत्मदायगो हरिं अनमत्
तिस्मिन् व्यापिने समस्याऽपि अनुज्ञीनमस्या। तत्तिसव्यापिने आत्मप्रदायगो आत्मनः स्व स्य दायो क्षेत्रादेः गच्छति विद्यते इति आत्मदायगः ... हरिं अनमत् ...
मस्कृतवान्। नमप्रकृष्टे शब्दे चेति सूत्रो लङ्परस्मैपदं। ७। निजेति तदागृहादिषु न नमस्कारवान् निजे स्वकीयेजने पित्रादिजने हे वासुदेव

श्रीराम
।।२।।

विश्वं त्वयन् निश्चमनंतचिन्तकः समस्तसंन्यासनिबंधनिश्चयः। असावनुसाम्यमिथानमद्धरिं समस्तसंव्यापिनमात्मदायगः। ७।
निजेजने किं नमसीति पृच्छति भुवनस्थ नस्तु प्रणतिं व्यधामिति। गुरोः किलान्वेषणवान् जगद्गुरुस्तदा जगामारिबिलं नवनीतस्तकः। ५।

श्रीराम
।।२।।

नि मुद्रस्य नमसि नमस्कारोऽपि इत्येवं पृच्छति सति चेन्निजे जने प्रति। स्वच स्तोप्रणाति स्वकीयेषु वस्तुप्रणतिं नमस्कारं व्यधां। कृतवानुअपा
मोऽलुङ् परस्मैपदं। अधाव अधाम इत्येवं वृन्तप्रभुत्वादेवदनू अप्रस्वचं अज्ञाब्देन मुख्यतः स्वस्वामि भूतमुख्यं वस्तु परब्रह्मेवाभिप्रेतेनस्मै
प्रणतिं व्यधामित्यभिप्रायेऽप्रवक्ष्यन् अमुख्यया वृत्त्या वक्ता शब्देन वनक्षेत्रादिपदार्थस्यापि गाभ्य। ततः न प्रणतिं व्यधामिति भुवन्निवपृ
च्छता प्रश्नोत्तरं दत्ता जगद्गुरुः स्वयं जगतो सकललोकानां गुरुरपि गुरोरन्वेषणवान् अन्वेषणं मार्गणं अस्यास्तीति अन्वेषणवान् नूनं यस्मा
म गृहीतुं योग्यैः गुरुर्विचारयन्निति यावत्। जगाम विलं गतवान् गमुलगतौ इत्यस्मात् लिट् परस्मैपदं। वा मुद्रि भगवदितस्य सर्वस्यापि गुरोः
अतः एतस्य गुरुविचारणालो

म०१। कानुकरणार्थमिवेति सूच्यति। विलम्बादेन लोकविडंबनस्य प्रयोजनमाह। अखिललोकशिक्षक इति अखिललोकान् देवादीन् शिक्षयत्यनश्रा
कस्त इति। अयं भावः अज्ञस्य गुर्वपेक्षा न त्वाप्तमज्ञः तथापि ज्ञानिनो देवान् मनुष्यादिजनान् सुखज्ञानादिगुणप्रकाश अज्ञानिवद्गु
गुरुमुखात् श्रवणादिकं कर्तव्यमिति लोकशिक्षार्थमिव गुर्वन्वेषणं कर्तुं जगाम इति। तच्चोक्तं धर्मे हि सर्वविदुषामपि देवतानां प्रत्येनरे
षु जननेन रते प्रवृत्तिः ज्ञानादिगूहनमुक्तं व्ययनादिरत्रेति॥५॥ यतिरिति। तस्मिन्काले भुवि भूमौ यतात्मा यतः निगृहीत आत्मा मनो ये
न सः यतात्मा आत्मा देहे मनो ब्रह्मेति विश्वः। विभूषणः विगत कुंडलादि विभूषणं यस्मात् स विभूषणः। भूरिविरतिभूषणः भूरिः भू
रिः भूयसी विरतिः वैराग्यं भूषणं यस्य सः अमयो मयने कारः यस्य सत्त्व प्रेक्ष्य एवं भूतः न यतिः संन्यासिचिह्नं अभवत्। शुचिः उ०१।
शुचिमनो वाक्कायकर्मभिः शुद्धः शुचिः शुद्धेन पठत्यति विश्वः। यथेति न नाम। मात्रा तु नामैव नाममात्रेत्त स्मात् शब्द एवेति भावः।

यतिर्यतात्मा भुवि विभूषणो नामवद्विभूषणो भूरिविरति भूषणः। न नाम। शुचिमनयति यत्तेनोऽच्युतप्रेक्षमुदाहर
स्फुटं॥६॥

मात्रकास्यैव घार योऽपुरमरः अच्युतप्रेक्ष शब्दार्थकत्वाय अच्युतप्रेक्षनामानं गुदाहरत्। अन्वयवदेव अच्युतप्रेक्ष इति उपाधिवत्
सोकेति नाम अस्य न भवति। किंतु अच्युतस्य हरेः प्रेक्षज्ञानं यस्य स अच्युतप्रेक्ष इति सार्थकं नाम तस्य यत्तद्देतिभावः। प्रेक्षोपल
ब्धिश्चित्संवित्प्रतिपत्तिज्ञप्तिचेतना इत्यमरः। अनेन शुद्धत्वमनोनिग्रहः वैराग्यं भगवज्ज्ञानं संन्यासिनो विशिष्टा गुणाः। एते तस्मिन्नच्यु
तप्रेक्षे सन्तीति तस्य संन्यासदातुं अधिकारस्थितमुक्तं॥६॥

पुरेति। पृषः कृष्ण्युतप्रेक्षनामायत्तिः पुरा पूर्वजन्मनियतिः स नृ मधुकृत्प्रवृत्तिमान् मधुकृत् मधुकारः भ्रमरः तस्य वृत्तिरिव प्रवृत्तिरस्यास्तीति तिरस्याल्ली तिमधुकृत्प्रवृत्तिमान् भ्रमरो यथा तत्र तत्रानेक पुष्पसौरभ्या नेनं नर्तनं तथायमपि गृहे गृहे स्वयोग्यानेव भिक्षान्नमश्नन् वर्तमान इति भा वः मधुकृत्वृत्ता मधुकरः मधुलिप्स्युपालिनः इत्यमरः स तादृशः स नृ कृष्णाकरसिद्धशुद्धिमदन्नभुक्त्या कृष्णा पाण्डौपद्याः करः हस्तः ते न सिद्धं निष्पन्नं कृतपाकमिति यावत् शुद्धिः पवित्र्यमस्यास्तीति शुद्धिमत् द्रौपदीकृतत्वादेव पवित्रमित्यर्थः अत एव वरमुत्तमं अन्नं भिक्षयाल भ्यमोदनं तस्य भुक्त्या भोजनेन कृष्णायाः करः कृष्णाकरेण सिद्धं कृष्णाकरसिद्धं वरं च तत् अन्नं च वरान्नं शुद्धिमच्च तत् अन्नं च शुद्धिम द्वरान्नं कृष्णाकरसिद्धं च तत् शुद्धिमद्वरान्नं च कृष्णाकरसिद्धशुद्धिमद्वरान्नं तस्य भुक्तिः तया कृष्णाकरसिद्धशुद्धिमद्वरान्नभुक्त्या जितेंद्रियि तः पवित्रीकृतात्मदेहः मन्त्रश्रयस्य सततयोगतः पाण्डवालये पाण्डवानां आलयः गृहं यस्मिन् नृशंसपाण्डवालये तस्मिन् हस्तिनावती पुरादौ पाण्डवदेहवासिनस्तिष्ठदिवत्सराणुवत्सरान् मुदा सन्तोषेण यातायातचकार कि लेशेनेवर चैव मितिक्रमस्तीति सूचयतिवर्षपूर्वजन्मन्यपि यतिरेव भिक्षान्नचरणनियमवान् स नृ द्रौपदीदत्तभिक्षान्नभोजनेन निर्मलीकृतदेहात्तः वैराग्यः सन् कतिपयवर्षेषु मेदापाण्डव

पुरैष कृष्णाकरसिद्धशुद्धिमद्वरान्नभुक्त्या किल पाण्डवालये। विशोधितात्मा मधुकृत्प्रवृत्तिमान् चचार संवत्सर
मप्यहर्मुदा ॥७॥

देहो सञ्चारं कुर्वन् अभूदिति भावः ॥७॥ अभूदिति। यतेऽच्युतपेक्षस्य क्रमानागतत्रमेघागतात् प्राप्तात् विप्रतिसारः पश्चात्तापात् पश्चात्तापो नुम पश्चात्प्रतिसारः इत्यमरः ॥ कुष्ठरोग्यसनं कुष्ठिनं च तत्कुष्ठादिकरं च कराश्च भाषिशास्त्रे पापकृत्सु कुष्ठेष्वपि कुरीत्यमरः तस्याभ्यसनं श्रवण मननादिरूपाभ्यासः अस्मिन्कुदाचारेऽनिपातनेऽर्थः पातकरणे न भूत् कुमाषिप्रणीतकुष्ठित शास्त्रश्रवणादिकं निषिद्धं निरयपातनकारणमपि अस्य पातकरणाय नाभूत् कुतः श्रीमच्छ्रवणादिनात्र अवधानतरादन्नपश्चात्तापात् पानविनामपि पश्चात्तापेन पातकनिवृत्तिसंभवादिति भावः अत्र दृष्टान्त

श्रीराम ।।२।।

श्रीराम ।।२।।

म०॥ मलमिनानस्मिन्व्याधवरस्य जरानाम्नो व्याघश्रेष्ठस्य कुत्तास्त्रघ्यसनं कुत्तास्त्रस्य बाणस्य घ्यसनक्षेपपाच कुत्तास्त्रा ध्यासनं तस्य व्या ज०॥
घस्य पश्चातापान्निमित्तात् सयन्हितपातकारणांनाभूत् । तयेतिपूर्वेणान्वयः । अयमत्र कथासंग्रहः परंधामगमनकाले अश्वत्थमूले उपवि
ष्टस्य कृष्णस्य तिरस्के पादतले पद्मैति भ्रांत्या जरानामको व्याधः शरेणैव विव्याध । अनंतरं तत्समीपमागत्य श्रीकृष्णं दृष्ट्वा पश्चात्तापं कृतवान् तेन
बुसिनं दारकस्य पणं कर्मपापं कारणं मा भूदिति ॥८॥ विनीतमिति । गुरुः अच्युतप्रेक्षस्य गुरुः कदाचित् कस्मिंश्चिद्दिवसे निजां स्वकीयां मूर्तिं
मरण उपागतो समीपे आगतां प्राप्तां विदित्वा ज्ञात्वा समीपवर्तिनं मरणकाले ज्ञातेन यः । विनीतं वश्यं प्रयोगे निभृतं विनीतापाश्रिता समी
इत्यमरः विनयोपेतमित्यादि वचनात् आम्नायशिरोविशारदं आम्नायाः वेदाः स्मृतिस्त्री वेद आम्नाय इत्यमरः तेषां सिरांसि शीर्षस्थानीयाः॥

अभूल्लुब्धा स्त्राघ्यसनं नपातकं जामाद्दताद्धि प्रतिसारतोयं ते ।य घ्यकुत्तास्त्रघ्यसनं मुरद्विषः पदांबुजे व्याधवर
स्य गां हि तो ॥८॥ विनीतमाम्नायशिरोविशारदं स दैवतं हं प्रभुं वै सुमाहरात् । गुरुर्विदित्वोपगतां निजां मूर्तिं कदाचिद्रूचेनमु
पह्वरे गिरा ॥९॥

उपनिषदर्थ इत्यर्थः । तत् सुतदर्थविचारे विशारदं निपुणं । सदाततमेव भगवत्स्वरूपमेव प्रबुभुत्सुः प्रवर्षेपाय यथार्थेन बोधुं इच्छंतं अच्युतप्र
सं उपह्वरे एकांते उपह्वरसमीपे स्यादेकान्ते चरथे पुमानिति विश्वः । आदरात् स्नेहात् गिरा वाचा उचे अब्रवीत् वच परिभाषणे इ
मते । लिडाम नेपदे ह उचाल उचे इति ॥९॥ किमुवाचे मत्त आह अहमिति । यादिना सुव्रते ओमनातिजन निविष्णुपचे काद्वीति
यस्य सः सुव्रतः तस्य स बुद्धिहे सुजने ति । अहं स्वयं प्रेक्षावतू ब्रह्मइति चिंति ज्ञो नेह इति धातोः पदाः स्फुटं सम्यक् विज्ञे मे नप
दिपर्वा भवेत् । तदा मत् मत्तः परं अन्यत् किं चिन्तनास्ति इति प्रकारेण आइह तत्वविषये माया यम् लोपं पादितं माया यार्थे अज्ञा
नस्ये समये असिद्धोस्मन्समयः शपथाकारकालसंविदः इत्यमरः सर्वमज्ञानेपादानकमिति सिद्धांतमिति यावत् ॥

द्वेष ॥ मास्म विश्वसीः ॥ अश्वसिहि ॥ कथंभूतो निरन्वयं निर्गतः अन्वयः उपपत्त्यादिलिंगं यस्मात्तं निरन्वयं हेतुमन्तमिदं वि
शेषणं निरन्वयत्वात् उपपत्त्यादिलिंगरहितत्वात् इति शेषः उपपत्त्यादयस्तु उपक्रमोपसंहारौ चाभ्यासापूर्वताफलं अर्थवादोपपत्ती च लिंगं
तात्पर्यनिर्णये इत्युक्ता ज्ञेयाः ॥ १० ॥ यदीति हे सौम्य शांतनूप उपास्तिश्चेदिति उपास्तये उपासनाय चोदितं मायावादिनोक्तं यच्च आत्मैक्यं ॥
आत्मनंदेवानामेत्यैनवेवन्नं मम गुरोरेव किंतु पुरातनानामपि मम गुरोः सकाशात् पूर्वेषामपि ज्ञानिनां कुत्रचिन्नु कस्मिंश्चिज्जीवे जीवब्र
ह्मैक्यं अपरोक्षतां नगतं ॥ ततः अस्मै वयस्य साक्षात्कारगोचरत्वात् युक्त्यादिसहितं मुकुंदं सर्वेषां जीवानां मोक्षप्रदं असंतं भिन्नमिति याव
त् गिरिं मुदा संतोषेण प्रसन्नबुद्धिः सन्नित्यभावः सविशेषेण हृदा ज्ञानघनं ज स्वउपास्व भजस्व ॥ सेवायामित्यस्मात्लोट्रूपं परस्मैपदं भज भजतां भजंतेति ॥ दिनीति

अहं स्वयं ब्रह्म न किंचिदस्तीत्यमर्त्यविज्ञंभितपरास्फुरंति तिः ॥ इति हि मायासमयोपपादितं निरन्वयं सुव्रत मास्म विश्वसीः ॥ १० ॥ यदेतदात्मै
क्यमुपास्तिचोदितं न मे गुरोरप्यपरोक्षतां गतं ॥ पुरातनानामपि सौम्य कुत्रचित्ततो मुकुंदं भज संविदे मुदा ॥ ११ ॥ इति दिमादिस्यक्यो वचे
स्विनीस्व वेगुरोलोकमथान्यमीयुषा ॥ असेवता लोक्य मुहुर्गुरोर्गिरिं स नूप्यपीठालयमिंदिरापतिं ॥ १२ ॥ श्रीगुरुभ्यो नमः ॥ श्रीरामः ॥

स्वस्विनी स्तुतुरवच्चने स्वरवस्वकः तस्मिन्नात्मीये सर्पः आलीये स्वोदास्त्रिपाद्यनेत्येति विश्वः ॥ गुरौरतिरस्य पूर्वोक्तिवच्यः वचनं भावितं वचनं वच
इमरः आदिस्यउदयादिस्य अन्यलोकं परलोकं ईयुषि सति गते सति मृते सतीति यावत् अय अनंतरं सः अच्युतप्रेक्षः ॥ गुरोर्गिरिं मुकुंदं भजेत्
तो वच्चनं मुहुर्मुहुः पुनःपुनः ॥ मुहुर्मुहुः पुनश्च श्वदित्यमरः आलोच्य विचार्य अंततः करोम्येवेति निश्चित्य स नूप्यपीठालयं नूप्यपीठं रजत
पीठपुरं आलयो यस्य सः तथोक्तः तं इंदिरापतिं इंदिरायाः लक्ष्म्याः पतिं अनंतेश्वराइंदिरापतिमिति ॥ विशेषणः असेवत असजत ॥ वे
वृषेवृषसेवायामित्यस्मात् ङुडात्मनेपदं असेवत असेवेता असेवेतेति ॥ १२ ॥

म०। अ०।

सुभक्तिनेति। परं सर्वेत्तिमं दूरानात्मनेत्तमः परा इत्यमरः। हरिं बुभुत्सुना॥ बोद्धुं ज्ञातुमिच्छता सुभक्तिना सु अति शयिता भक्तिः यस्यासौ
सुभक्तिः तेन सुभक्तिना तेनाच्युतप्रेक्षेणात्र व्रजेनतपीठपुरे निषेवितः नितरां सेवितः भक्तवत्सलः भक्ते षु स्निग्धः श्रीमानुस्निग्धस्तु वत्स
लः इत्यमरः। सः अनंतेश्वरः पुरुषं कंचनपुरुषं प्रविश्य सन् हे अच्युतप्रेक्ष अहं जविषतः कालांतरे आगमिष्यतः शिष्यवराद्धिशिष्य बु
वराद्युत्तमाः देवाः हिरेत्ता वव धारयोड्यमरः। मां विधि ज्ञानीहि इति अभ्य धात् अब्रवीत् विद् ज्ञाने इयत्तो लोट्परस्मैपदं। विधि क्विति वित्ते
तिम् अभिपूर्व का ध्यालङ् परस्मैपदं अधात् अधात् अभ्यधुरिति। अयंभावः हे अच्युतप्रेक्ष मद्विषयं तत्र ज्ञानार्थे तया सेवितोहं परितु
ष्टोस्मि। मत्प्रसादादेव उत्तमः शिष्यः ते भविता तदुक्तप्रकारेणेनमितेन माननुष्य वमं ज्ञानीहि इति अब्रवीदिति। ।७३। प्रतीक्ष्यमिति। सतां
सज्जनानां गुरुः ज्ञानोपदेष्टा कारणमानुषाकृतिः कारणेन निमित्तेन मानुषस्य मनुष्यमानुषामर्त्य इत्यमरः। आकृतिर्देहो यस्य सत्तथोक्तः
स वासुदेवः तं हरिवृत्तं अनुग्रहं शिष्यप्राप्तिरूपं प्रसादं प्रतीक्ष्यमाणं कदा वा आगमिष्यति किं शिष्य इति ध्यायं तं पुनः पुनः भूयोपि अंबुजेक्षणं अंबुजवत्

सुभक्तिनातेन सभक्तवत्सलेनो निषेवितस्तत्र परं बुभुत्सुना॥ भविष्यतः शिष्यवरात् स्थि विधि मांइति प्रविश्य पुरुषेत्तमभ्यधात्॥
॥७३॥ प्रतीक्ष्यमाणं तमनुग्रहं मुदा निषेवमाणं पुनरंबुजेक्षणं॥ स तं गुरुः कारणमानुषाकृतिर्यतिं प्राज्ञं तमुपाससाद॥
॥७४॥ सुते यतीन्द्रानुचरे विरागिणि निशम्य सन्न्यासिनि बद्धमानसौ॥ सुवत्सलौ नूप्यत्तवलाल्यवरियतं वियोगिनौ तोपितरौ समी
यतुः॥ ७५॥

यस्य सत्तथोक्तः तं हरिं मुदा निषेवमाणं भजनं प्रशान्तेरौ प्रकर्षेण निशावतं अच्युतप्रेक्षमुपाससाद उपसत्तिमकरोत्॥ शिष्यत्वमापुत्रिति अभिवत्वा
त्तिभाव उपसादु पूर्वात् षद्लृ विशरणगत्यवसादनेषु इति धातोर्लिट् परस्मैपदं। ससाद सेदतुः सेदुरिति। ।७४। सुतइति। सुते वत्सलौ पुत्रे सुष्ठुस्ने
हवंतौ वियोगवंतौ वियोगे न पुत्रविरहेणार्तौ तौ म्लानौ प्रसौ तम्लुग्लानाविति धातुः पुत्रविरहमसहमानाविति भावः पितरौ माता च पिता च पितरौ
वासुदेवस्य जननी जनकौ माता पितरौ पितरा विरमरः। सुते यतीन्द्रानुचरे यतीन्द्रस्य संन्यासिनि संन्यासिन्ये हस्या अच्युतप्रेक्षस्यानुचरे शिष्ये

विषये निबद्धं कृतं निश्चयमानसं अंतःकरणं यस्य सः तथोक्तः । तं नृपतलालयस्थितं नृपं रजनं नलं रक्तपंयस्य स नृपतेतलः स्वनृपार्थं धारयो
ति विश्वः नृपतलः नृपालकस्यासौ आलयश्च नृपतलालयः रजनपीठपुरमित्यर्थः तस्मिन् वर्तमानं निश्चयं स्पृहा समयेत्तुः कृत्रं सन्यासाश्र
म निवारयितुमपि अजयत्तुः पाजक स्तोत्रादि तिङ्घोषः इङ्गुगत्ता वियनेलिट्परस्मैपदं उयाय ईयतुः ईयुः । ७५ । विदेति । तौ पितरौ अपि ष्ठिनंदना
सुत जरतोर्वृद्धयोः प्रवयस्य विरोवृद्धो जीनो जीर्णो ऽजनयीत्यमरः । जनो घ्ययोः अंतेवयसि वृद्धा विनापालकरहितयोः जीवतो जीवमानयोः सतोः सेत
ववराश्रमः वरः उत्तमः आश्रमः यस्याश्रमः तस्मात् । न भवेत् इति एवं प्रकारेण सयाचनं याचना प्रार्थना तया सहितं इदं वाक्यं उदीर्य उक्त्वा परी
यप्रदक्षिणीकृत्य पुत्राय वासुदेवाय नतिं नमस्कारं नतिः स्त्रियां नमस्कारप्रणामश्च नमस्त्रियेत्यमरः । वितेनतुः चक्रतुः । तनु विस्तारे इत्यतः लिट्

श्रीराम ॥१५॥ परस्मैपदं । ततान तेनतुः तेनुः ॥ ७६ ॥ नतिमिति । तं शिशुभुजं नायकं शिशुश्चासौ जनश्च शिशुजनः तस्मै नतिः नमस्कारः न ह्यस्यते श्रू
न विहितेति भावः । तथापि सेवके मयि सांप्रतं अधुना अधुना सांप्रतं तत्समयेत्यमरः । स्फुटं सर्वजनसमक्षं भवद्भ्यां युष्माभ्यां नतं नमस्कृतं तत्तए वविधा
त्रा अदृष्टप्रेरणोके पा हरि या स्वयमेव मम प्रार्थनं विनैव तत्र दम्यनुज्ञानं अस्मिन् न्यस्तोऽश्रमस्वीकारविषये अभ्यनुज्ञा अनुमतिस्तद्दपिता प्रदत्ता पिता । अहो

वराश्रमस्ते जरतोरनाथयोर्नजीवतोस्याद्यपि नंदनावयोः । सयाचनं वाक्यमुदीर्य तावितिदरीत्य पुत्राय नतिं वितेनतुः ॥ ७६ ॥ श्रीराम ॥१५॥
नतिर्न शिशुभुजनायशस्यते मत्तं भवद्भ्यां स्फुटमत्र सांप्रतं । अहो विधात्रा स्वयमेव दत्ता वितातदाभ्यनुज्ञेति जगाद स प्रभुः ॥ ७७ ॥

एतदाश्चर्यं अयं भावः उत्तमोन्यः कनिष्ठश्च नमस्कर्तेति किं विहितो नीतः । तथापि आभ्यां भवद्भ्यां नतमायत्तु । मम प्रकृतेय आश्रमनिमित्ते
उत्तमम् अहं भविष्यतीति विधिना सूचितं तस्माद्विधिना भवद्भ्यां अनुज्ञायाः दापिता नु मम वराश्रमो ऽपरिहार्य एवेति भावः । इति हर्षसपत्रसुतः सु
दिवः पितरौ प्रति जगाद अब्रवीत् । गद व्यक्तायां वाची इत्यतो लिट् परस्मैपदं जगाद जगदतुः जगदुरिति ॥ ७७ ॥ अनुत्तरज्ञ इति । स मध्यगेहः
अनुत्तरज्ञः प्रत्युत्तरं न जानातीति अनुत्तरज्ञः सुतवचनस्य प्रत्युत्तरमजानन् स नृपः प्रियायुतः प्रियया भार्यया युतः युक्तः स नृपुन ॥ ७८ ॥

न्यो पिहपुत्रं अर्थयन्तूरे नेर न यस्या आश्रमे। न दातव्य इति प्रार्थयन् यती क्रुधं प्रतिश्रेष्ठ मन्युं प्राप्तः सन् उत्ततः स्वमंदिरं प्राप्य नंतरं गृहे च सन् वासं
चुर्वन् क्षणानूए वै क।क्षणान् तन्नाम कल्प काले विशेषानू काले विशेषो सवयो र्कोणा इति अमरः।कल्प समानू कल्पेन जहुन सरालकेन
काल विशेषेण समान्नूत्न्यानू नयन् क्षपयन् अनिशं निरंतरं सुतान नैं प्रे सुतस्य न नमुखं मिंदुरि व चेंद्र इव च स्य सुतान नेदो दिति।अ
धिगतद शांक मधि षष्ठी अगधः शे।अनाथः सुतान नैं दुमिस थः अस्मरत् स्मृतवान्।स्मृति चिंतया मिति धातोः न्वेः प्रस्मेपद।दुः
खेन।क्षणो।कल्पायते इति।तृष्णि युगायते ग्राम पर्यस्य तादो प्रसिद्धं अतः कल्प सम मित्युक्तं।सस्ततिद्रुष्या शोकेन दुःखेन स्वयं मन्युशोकौ
शाव स्त्रियामित्यमरः।पुत्रमनोरथं पुत्रस्य वासुदेवस्य मनोरथ सन्यस्त विषय वांछां।वांछा तृष्णा मनोरथ इत्यमरः।चिंतयन् स्मरन्
समरः।पुनश्च महानदी महती च सा नदी च महानदी तां।वेत्रावती नाम नदीं तीर्त्वा तीर्य उपगतः प्राप्तः सन् ग्राम वरे क स्मि प्रिन्कु मठे प्रेम
अंतरे प्रच्येयतीश्वरानू व्रतयती श्वरस्याच्युत प्रेक्षस्यानुकूलं व्रतं यस्य रच्यती श्वरान् व्रतः तं आसनंद नक्षा सन रस्वस्य नंद नंसुतं
रक्षत् ददर्श दृष्टुरशनिं अकेन यो रिति धातो लङुन्मने पदं ऐक्षत ऐक्षतां ऐक्षं तेति॥१९॥ सइति।सघरासुरः।ब्राह्मणः अलमंसंतं महालसं

अमुतरक्तः स तन्मर्षयन् पुनः यतींद्रमानं म्यगतः प्रियासुतः।गृहे वसन् कल्पसमं नयन् क्षणान् सुतानने दोर निशं ततो
स्मरत्॥१८॥सचिंतयन् पुत्रमनोरथं शुचा पुनश्च ती वेपगाते महानदीं।यतीश्वरानू कूतमा समनेत्त मैक्षत ग्रामवरे मठां
तरे॥१९॥सजातकोपो ज्वलितो घरासुरो महालसं नालेघन भीरुरप्यलं।सुतस्य कौपीन घृतो हि साठ स प्रतिश्रवो मे दृष्टं ऐह

आयशालेघन भीरुरपि।लंघनादतित्रासणात् भीरुरपि भयशीलोपि जातकोप प्रज्वलितः स्ववाक्यं न करोतीति महा जाते कोपे न क्रोघनाज्वलितः
वशीकृतः सन् इति अभाषत अब्रवीत्।किमिति।सुतस्य कौपीन घृतो कौपीनस्य गुह्यमात्रा च्छादनस्य वस्त्रस्य यतं देहस्यादीर्घ ध्विन्ये पठे क
ौशाप्सकं कौपीन मुच्यते अलेख्णामुत्तु।कौपीन दंडादि घृतो स्यांधारणो स तिमम साठ स प्रतिश्रवः सहठ आमठवादित्रूपवि चित्यि सह
सकरणप्रतिश्रव अंगीकारः प्रतिज्ञा यो वत्तु।दृष्टः केनाप्यपरिश्रियः इस अभाषत तत्व यः मे सुतः यस्या आश्रमं गृहीत श्रयत्तेअहं स्वप्रा पो

श्री

स्वयेनेति । विभुः स्वसुखेन सुतस्य कौपीनधारणे सति सहसं क्लिष्टमतिः पितुः प्रतिज्ञावाक्यं भङ्क्त्वा क्षणेन सख्यं न क्षणम् एवेत्यर्थः । निजं स्वकीयं पटं
प्रावरणवस्त्रं विदार्य करे दत्त्वा पिता कौपीनधरः धरतीति धरः कौपीनस्य धरः धारकः कौपीनधारकः सन् हे तात पितुः तातस्तु जनकः पितेत्यमरः
चिकीर्षितिकर्तुमिष्टं सह स चुरुत्ते इत्येवंप्रकारेण इमं पितरं प्रतिरुध्य पुनरब्रवीत् किमिति हे तात । भवान् चिज्ञातोऽस्त्येनो । सारो भवानू हृ अन्तरा
य शुभस्य विष्णुप्रीत्यर्थं विनमंगलरूपस्य यस्याश्रमस्य तनका । इति भावः । अन्तरायविघ्नाय । विघ्नोऽन्तरायः प्रत्यूहः इत्यमरः । न्यरदेत् नवयेत् इत्यग्नीदि
यन्वयः स्वरूत्ति क्षयायेति धातोर्लिङ् परस्मैपदं ॥२१॥ सुतस्य संन्यासस्वीकरणं शुभं न भाति । किंतु पितुः शुश्रूषा । अस्यैव मध्यगेहः । न पुत्रेत्यादिना ।
हे पुत्र सतः ज्ञानिनः । सन् सुधीः कोविदो बुधः इत्यमरः ॥ धर्मशास्त्रप्रवर्तकाः मन्वादय इति भावः । सुतस्य पित्रोः अवनं शुश्रूषादिरूपं अवनं रक्षणं
विना प्रकारं अन्यत् अपरं शुभं न वदन्ति किंतु पितृपालनमेव शुभं वदन्ति तथाहि वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः अप्यकार्यशतं कृत्वा भर्तव्या
मनुरब्रवीदिति न स्मात्तवयस्याश्रमादपि स्थविरयोर्वयोर्वनमेव शुभं न तु अन्तरायः क्रियते तस्मात्त्वया वि मुच्यते शुभं अन्तरायं न च रदेदिति पितरं अभिप्रा
प्रायः पुत्रोत्तरेण भवसालनेन भविष्यतीत्यह । नन्विति ते । न व भ्रातरो मम पुत्रा मृता ननु त्वमपि जानासि । हि इत्यभिप्रायः तस्मात्त्वयि निवर्तमाने सति नि

॥२१॥
स्वयेन कौपीनधरो निजं पटं विदार्य हे तात कुरुष्व साहसं । इतीममुक्त्वा विभुरब्रवीन्मुनस्तु अन्तरायं न भवांश्च रदेदिति । न पुत्रपित्रोरवनं वि
ना शुभं वदन्ति सन्तो ननु तौ सुतौ मृतौ । निवर्तमाने नहि पालकोऽस्ति नौ त्वयीति वक्तारमिमं सुतोऽब्रवीत् ॥२२॥ यदा विरक्तः पुरुषः प्रजायते तदै
व संन्यासविधिः श्रुतौ स्मृतः । न संगही नोपि परिव्रजामि वा ह्यहं तु हि श्रूयतां मे वाक्यमेतत् ॥२३॥

सति । निवृत्तिमार्गो नाम संन्यास एवानौ । आवयोः पालको नास्ति हि इति एवंप्रकारं वदन्तं तं अमुं पितरं प्रति सुतः अब्रवीत् । युवयोः कार्याय त्वा चिद्युतोऽल
उ॰ [illegible]परस्मैपदं ॥२२॥ वैराग्यरहितस्यैव पितृपालनं शुभमिति ज्ञात्वा । लिनौ अभिप्रायः । विरक्तस्य संन्यासस्वीकरणं मे शुभं अन्यथा स्मृतिविरोधः
इत्याह यदेति । पुरुषो यदा यस्मिन् काले विरक्तः वैराग्यवान् जायते भवति तदैव तस्मिन् काले संन्यासविधिः स्वीकारः श्रुतौ स्मृतः प्रसिद्धः । सा च स्मृ
तिः । यदहरेव विरजेत् तदहरेव प्रव्रजेत् इति प्रसिद्धा । अहं तु संगही नोपि संगेन विषयसंगत्यागी नोपि रहितोऽपि विरक्तोऽपीति यावत् । वयं युवयोः शि

श्रीराम ॥९१॥

श्रीराम ॥९१॥

न्यासग्रहणाच्च धर्मः इदमुभयं एकस्य न संभवति अतो विरक्तस्य संन्यासः तद्रहितस्य पितृशुश्रूषणं च धर्मः शमस्तु विरक्ते उत्तिष्ठन् संन्यास एव ध
र्मः तथापि तत्रहितेः संयोगोपि युवयोः रक्षकं सोपाश्रयित्वा संन्यासं स्वीकरिष्ये इति भावः ।।२३।। बहिर्निष्क्रमिष्यदि यच पिअत्र बहुश्रुतत्वात् बहु बहुलं श्रुतं
श्रवणं यस्य सः बहुश्रुतः तस्य भावो बहुश्रुतत्वं तस्मात् बहुगुरोपश्रवणबलेन विवेकित्वादिति भावः ।। बलाद्धैर्यायितत्तवपरिव्रजनं सहेमे।
र्तुं समर्थः ।। षह मर्षणे इत्यतो तुमुन्नेपदं । सेहे सहते सहोढा सहे तथापि तेन वसासमित्री जननीति विरहं न सहेत्तासे ।। देशे क्वचा न भवेतु सेढव्या
त्तो लिङि आत्मनेपदी सहेयाता परस्मैपदेऽनुरुद्धेत् ति द्विजेन पित्रा अस्मि तदुक्ते सति सवसुदेवेः ठेत्ततः तभ्रं नानुमानं ज्ञां प्ररातु मम ययासमस्वीकार विषये अ
गीकुर्विति ब्रुवन् पितरं अनमत् नमस्कृतवान् ।।२४।। विचिन्त्येति एवं निरुत्तरीकृतः निर्गत्ते निर्गतं उत्तरं यस्मात् स निरुत्तरः निरुत्तरं कृतः पाद्धनिः
निरुत्तरीकृतः अप्रतिभात्तत्प्रस्तुतरस्यार्थः विद्वान् विपश्चित् सुतः अद्दुः विचिन्त्य विमृश्य अवदामी जिविचिन्त्य क्विचार्य यदि मातात चजननी हृदुतमिति
त्रोषः ।। अनुवदेत् संवादं कुर्यात् अंगीकुर्यादिति यावत् तर्हि तथा तदुक्तप्रकारेण । स्तुभवेत् । इति इत्थं सुतेउदीयकृहात् तक्षेशात् सुतो वेरहास

बहुश्रुतत्वाद्यदि तन्न सहेत बलान्न सा सत्री विरहं सहेतत्तो प्रतिद्विजेन । भिष्ठितेन मत्सतं भवाननुज्ञां प्रददातीति ब्रुवन् ।।२४।। विचिन्त्यवि
द्वान्स निरुत्तरीकृतस्तथास्तु माता नुवदेत् तदिति । उदीर्य कृष्णादुपगम्य मंदिरं प्रियासकाशे तमुदं तमब्रवीत् ।।२५।। मूल्यानि शाच
रारेरिव लक्ष्मणः पुरा वृकोदरस्येव सुरेंद्रनंदनः । गदाग्रजस्येव च कर्मकृत्प्रियः सुभाति मानुविश्वविदो नुजोभवत् ।।२६।। ५।। ७।।

दिष्ट्युवादिति । भावः । मंदिरं स्वभवनं उपगम्य प्राप्य प्रियासकाशे प्रियायाः भार्यायाः समीपे सकाशोत्तं सुतस्यात्मनस्त्र्यविवादस्तत्पर्युदत्तं वृत्तान्तं वार्त्ता
प्रवृत्तवृत्तान्त उदन्तः स्यादित्यमरः अब्रवीत् ।।२५।। निशाचरारेरिति अथा किंचिन्मालान्तरं पुरा पूर्वं निशाचरारेः । निशाचरस्य रात्रिचरस्य रावणस्यारिः रि
पुः रामश्चेतस्तस्य । रिपावैरि सपत्नारिः इत्यमरः । लक्ष्मण इव कर्मकृत् कर्मकरो सीतिकर्मकृत् वृकोदरस्य भीमसेनस्य सुरेंद्रनंदन इव सुरेंद्रस्य
देवेंद्रस्य नंदनः तनयः अर्जुन इव प्रियः प्रीतिविषयः शौरेः शूरस्य गोत्रापत्यं पुमान् शौरिः तस्य श्रीकृष्णस्य गदः इव गदनामानुज इव सुभाति ।

आहसमरः छनिवर्णहोरे नतः ।२६।

मानुविश्वविदः समः विश्वविदः सम सुविदितम्
तस्य विश्वविदः सवैद्यसहितं वा नुजः अवजः

॥श्रीराम
॥७१॥

कदाचिदिति अलयबुद्धिः नविद्यते लयः नाशः यस्याः सा अलया अलया बुद्धिर्यस्य सः अलयबुद्धिः प्रलयेप्यविलुप्तज्ञान इत्यर्थः वसुदेवः कदा
चित्कस्मिंश्चित्काले आलयं स्वगृहं निकाममनिलयालयाः इत्यमरः आपृच्छ्य आपृच्छनेनं वासुदेवं यत्तयोः पित्रोः पालकं निवेदयन् अयं वः पाल
क इति ज्ञापयन् पुच्छ्य वानुमत्या राघवस्य भर्तुः धवः प्रियापतिर्भर्ता इत्यमरः अनुमत्या संमत्या नाहं स्य संन्यासनिषेधानिश्चयात् हृदः अत्तिअति बंधेन
स्वस्वसंन्यासः स्वसंन्यासः तस्या निषेधेनिवारणे कृतो निश्चयः यया सा तां मातरं प्रति इदं वक्ष्यवक्ष्यमाणं वाच्यमुवाच किंचपरिभाषयोरित्य
लट्परस्मैपदं ॥२६॥ वराश्रमेतिहे अंब मातः अंबा माता तथा बान स्यादित्यमरः यदि कदाचिदपि यस्मिन् कस्मिंश्चित्कालेपि वा। मं इच्छितु दृष्टुं इच्छ
सि तर्हि मम वराश्रमात्संवरस्व उत्तमः वासो आश्रमः श्रेष्ठ आश्रमः यस्याश्रमः तस्य स्वीकरणं संवरस्व अनुजानीहि अन्यथा सेवार्थं न करोषि चेत्तर्हि
इमे देवाः पप्रिय जनूं सनूं जातु कदाचिदपि कदाचित् जातु साधेत्यमरः वः युष्माकं पितादीनां दृशो दृष्टेः विषयगोचरः न भवामि यत् यस्मा

कदाचिदप्यलयबुद्धिरालयं निवेदयन् पालकमेन मेत्य ये ॥ स्वस्वसंन्यासनिषेधनिश्चयं धाववनुमत्येदमुवाच मातरं ॥२७॥ वराश्रमस्य
मम संवरस्व मां कदाचिदप्यादिदृक्षसि यदि तु ॥ यदन्यथा देशमिमे प्रियजनूं न जातु दृष्टेर्विषयो भवामि वः ॥२८॥ इति ब्रुवाणेन तनये कदा
चिदप्यदर्शनं तस्य मृते निदर्शनं ॥ विचिंत्य पयी कुलितां विकातं सुतस्य कृष्णान्यरूपां न साशुभाः ॥२९॥ श्रीगुरुभ्यो नमः ॥ श्रीराम

त् संवादयस्वेति भावः संपूर्वनिवर व्यक्तायां वाचीत्यस्मात् आत्मनेपदं। संवरस्व संवादे याथाः। संवरध्वं ॥२८॥ इतीति तत्तनये सुते इति पूर्वोक्त प्रका
रेणोवर इति सति पय कुलितां किमत्र कुर्यामिति संभ्रांता सती जीवतः सुतस्य कदाचिदप्यदर्शनं तस्य सुतस्य मरणस्य निदर्शनं दृष्टांतः समान
मिति यावत् विचिंत्य विचार्य सुतस्य चिकीर्षितं वचनं मिष्टं कृष्णात् दुःखात् न न्यरूपात् न निरोधनवति किंतु अंगीकृतवती इति भावः सुतस्य शुभा स्वस्य
नतः सकानुकूला गतातापूर्वोक्ते पुत्र वाक्ये मृताभीत्ता सती जीवतः पुत्रस्य अदर्शनं मरणतुल्यमेवेति महादुःखात् सुताभीष्टस्य निषेधं न्यरूपत्
रेति न्यायकार इति रिर आवरणे इति धातोर्लङ् परस्मैपदं अरुंधत् अरुंधतां अरुंधन् इति ॥२९॥ श्रीरामचंद्रजानकीरमणाय नमः ॥७१॥

श्रीराम
॥७१॥

म०१ अथेति। अयमातुः सकाशात् अनुज्ञा स्वीकारानन्तरं देववरप्रसादितः देववर्यैः प्रसादाभिमुखीकृतः जगद्गुरुः आत्तौ उपदेशवः सुरेश्वरः। ज०१
सुराणां देवानामीश्वरः नियामकः एषः वासुदेवः गुरुं अस्युत्तप्रेक्ष्यउपगम्योपसत्तिं कृत्वा तं गुरुं प्रसाद्य गुणैः तोषयित्वा सदसमस्ताश्रमभाकू
सदा सर्वदा युगपत् समस्ताश्रमहृदे श्रवते आश्रमाः समस्ताश्रमाः तान् भजतीति समस्ताश्रमभाक् प्रसन्नपि इदानीं विशेषतः मनुष्यदृष्टिविषये
तिनवराश्रमेषु आश्रमं अन्जत् स्वीकृतवान् खलु वासुदेवस्य युगपत्समस्ताश्रमवर्त्तीत्वं ज्ञापयितुमेव सुरेश्वरइत्यादि विशेषणं देवानां युग
पत्समस्ताश्रमभावोचितार्थं कृष्णस्य गृहिणो देवाः कृष्णाश्रेतेयत्तयः अन्तरेषां नपुत्रादायमुपयंतिन्स्यएते गृहानि विसर्जति अरागा अद्वेषा अमो
घाः सर्वयज्ञाः सर्व कर्तारइतिभूतौ देवएवब्रह्मस्यादिणो देवाएव अहस्थान्देवाएव वनस्थाइति श्रुतोप्रसिद्धः॥३०॥ त्रिवेलेति। कालवित् कालज्ञ
गाः सर्वयज्ञाः सर्व कर्तार इतिश्रुतौ देवएव ब्रह्मस्यादिणो देवाएव ग्रहस्थाः देवाएव वनस्था इति श्रुतौ प्रसिद्धः॥
मविशेषं वेत्तीति कालवित् वासुदेवः सकलं समस्तक्रियाकलापं त्रिकालीयं यथाश्रमोक्तकर्तव्यानां जीवश्राद्धादिकर्मणां कलापं समूहं विधानमार्गे नोदेहं दि
यासंन्यासविधायकशास्त्रोक्तप्रकारेण केवलं सम्यक् विधाय कृत्वा सदाप्रसन्नस्य हरेः प्रसत्तये विशेषतः प्रसादाय मुहुः समस्तन्यसनं समस्त पापन्य
स

अथो गम्येष गुरुं जगद्गुरुः प्रसाद्यतं देववरप्रसादितः॥ सदा समस्ताश्रमभाक् सुरेश्वरो विशेषतः खल्वभजत्तुराश्रमं॥३०॥ क्रियाकला
पं सकलं सकालवित् विधाय नमार्गविधायकेवलं॥ सदाप्रसन्नस्य हरेः प्रसत्तये मुहुः समस्तन्यसनं समभ्यधात्॥३१॥
अनन्तमात्रं तमुदाहरन्ति यं त्रिमात्रपूर्वं प्रणवाच्चयं बुधाः॥ तदा भवक्षान्विचक्षतुर्मुखाकृति जपाधिकारी पतिरस्य सूचितः॥३२॥

तं भगवति समर्पितं विधाय के मया सर्वसमस्तं शेषवत् पंचचनं समभ्यधात्। अब्रवीत् प्रणवोच्चप्रयाम करोदिति भावः। अभिपूर्वधात्मने दु
ङ् परस्मैपदं अधात् अधात्। अधुः॥३१॥ अनन्तेति। बुधाः ज्ञानिनः यं प्रणवं प्रणवं यं प्रणवानां उच्चयं समुदायं त्रिमात्रपूर्वं तिस्रो मात्राः
यस्मिन् सत्रिमात्रः प्रणवः त्रिमात्र एव पूर्वः आदिर्यस्य सः त्रिमात्रपूर्वः त्रिमात्रपूर्वं अनन्तमात्रं तत् अनन्ताः असंख्याः मात्राः यस्मिन् स
अनन्तमात्रः अनन्तमात्र एव अन्तः न मोयस्य सः अनन्तमात्रीतः तं अनन्तमात्रीतं उदाहरन्ति। यं ॐकारं त्रिमात्रप्रणवाद्यनन्तमात्रप्रणवा

श्रीराम
७८॥

वसानकप्रणवसमुदायरूपं वदति ॥ ज्ञानिनन इत्यर्थः अस्यैवंविधस्यप्रणवेच्छुयरूपस्यैकाक्षरस्यायं वासुदेवः तदात्तस्मिन्कालेसूचितः ॥ सम्यगुच्चि
योग्यः जपाधिकारी जयेप्रणवमंत्रावृत्तिकरणेअधिकारी अधिकारवानुयत्तिरभवत् ॥ कथंभूतः भाविचतुर्मुखावृत्तिः भाविनस्तुमरवृत्तलोकेकल्पे
भविष्यत्चतुर्मुखस्यब्रह्मणः आकृतिः स्वरूपभूतः अयं भावः त्रिमात्रप्रणवमारभ्यएकमात्राधिकक्रमेणचतुर्मात्रपंचमात्ररूपेणानंतप्र
णवपर्यंतत्वेनभिन्नाअनंताः उक्तेश्चएकादशस्कंधतात्पर्येएकविंशाध्याये त्रिमात्रादितः क्रमायाख्यानंतमात्रकाः प्रणवास्तेनिभेदेनभिन्नाः पृथि
त्ताः एकमात्रोनराः सर्वेवासुदेवाभिधायकाः ॥ तेषांव्याख्यानरूपाःसर्वेवेदाः प्रकीर्तिताः ॥ ॐकाराख्यंलिंगात्तस्मात्सदेच्छुयः पिपैरिति ॥
अत्रमात्रशब्देनएकदेशउक्तः अकारादयोवर्णाउच्यंते ॥ पादः अकारः उकारमकारइतिमांडूक्योपनिषदुक्तेः ॥ पादाअक्षराणीत्युक्तेश्च
प्रणवेत्रिमात्रस्यप्रणवजपाधिकारेसम्प्रापितचतुर्मुखस्यैत्रिमात्रपूर्वानंतमात्रावसानकानंतप्रणवसमुदायेॐकारमंत्रजपेमुख्याधिकारित्वात् अस्य
वावासुदेवस्यभविष्यच्चतुर्मुखत्वात् एतादृशप्रणवजपे अयमेवमुख्याधिकारी नान्यइत्युक्तंभवति यद्वाबुधाः त्रिमात्रपूर्वःस्त्रीमावः अकारोकारम
काराः पूर्वःयस्यसः त्रिमात्रपूर्वः तेप्रणवोच्छ्रयः अनंतमात्रोनंतः अनंताः मात्राः वर्णाःयस्यसः अनंतमात्रः वेदांतेनोनोनिर्णयायस्य सः अनंत

गुणानुरूपोन्नतिपूर्वनिर्दिष्टमुष्यनामद्विजवेदवेदितः ॥ उदाहरद्वर्यशाद्विकेवलंनमंत्रवर्णःस्वयमत्रवर्णकः ॥ २२ ॥

मात्रोंतःतेउदाहरतीअकारोकारनादबिंदुघोषशांतानितांतरूपाक्षराल्पवर्ण्यप्रणवसमुदायंवेदेननिर्णयमानवदतीति भावः ॥ अस्यैवंविध
स्यप्रणवतत्त्वस्यसूचितः ॥ जपाधिकारीयतिरभवत् ॥ कथंभूतः भोचिच्चतुर्मुखो ज्ञानसर्ववेदव्याख्यायाप्रणवजपेअयमेवमुख्याधिकारी ना
न्यइत्युक्तंभवति ॥ उभयगुणोत्ति ॥ गुणानुरूपोन्नतिः गुणानां अनुरूपा अनुरूपा अनुकूला उन्नतिरर्थउत्कर्षोयस्य ॥ गुणानुरूपोन्नतिः अन्वर्थ
वुभिरिति यावत् ॥ पूर्वबोधइतिपूर्वपाद इत्यमुष्ययतेः नाम नामधेयं नाम धेयं च नामधेयमर्थः ॥ केवलंमंत्रवर्णः वेदएवनोदाहरत् किंतुमंत्र
वर्णकः स्वतंत्रस्यप्रणवमंत्रस्यवर्णकः उपदेष्टा गुरुश्चोदाहरत् ॥ तायमस्यवृषानस्यदेहेसेदशाप्रमतिंजनयन्प्रणवोपदेशः तेन विदेहः अस्य दशा
प्रमतिशब्देनदर्शितिसर्वमुपदिष्टि ॥

हं पूर्वसिर्वमिहोच्यते॥ प्रज्ञाप्रमितिरुद्दिष्टपूर्वप्रज्ञस्तत्र तस्मात् स्मृतेः॥ पूर्णप्रज्ञस्य अन्वर्थकं नाम उदाहरन् अस्तित्वदेवपूर्वपूर्णप्रज्ञदर्शि
नामपदद्वयात्मकस्य गुरुरकस्योदितिभावः॥ कथंभूतः मंत्रवर्णः॥ मंत्रवर्णकि श्ये द्विजवृंदवंदितः॥ द्विजानां विप्राणां देन सद्वृंदेन वंदितः॥ नमस्
तः स्त्रियां नुस्वृकृतं वृंदं इत्यमरः॥ भूरियशाः॥ भूरि बहुतरं यशाः कीर्तिर्यस्य सः॥ भूरियशाः॥ इंद्रत्र विशेषणद्वयं मंत्रवर्णमंत्रवर्णकृत्योः समानं दाहर
नूआङ्पूर्वान्नूदहरणाय स्मात्कुंचरस्मैपदं॥ ११॥ निरंगरागमिति॥ जनवः शारियाः अन्यशरीरि इत्यमरः॥ निरंगरागं अंगस्य शरीरस्य रा
गः अलंकारः येन सः अंगरागः चंदनादिर्न विद्यते अंगरागो यस्य स निरंगरागः तं॥ नैनिस्त्रैगुण्ये निषेध्ये इत्यमरः॥ चंदनादिलेपरहितमित्यर्थः॥ मुखरा
गवर्जितं मुखस्य वदनस्य रागः अलंकारः येन तत् मुखरागेण वर्जितं जन्मादिच्युवर्यादि इत्यर्थः॥ विभूषणं विगतानि भूषणानि यस्मात् तं॥ विभू
षणाः॥ कुंडलांगदकोटीरकंकणांगुलीयकनूपुरादयः भूषणानि॥ एवंभूतमेन पूर्णप्रज्ञाचार्यं वृत्ताषाढ॥ वृत्ते आषाढः दंडः त्वं आषाढेन तिन्नो दंड इत्यम
रः॥ विष्टपभूषणायितं॥ विष्टपस्य भुवनस्य विष्टपं भुवनं जगदित्यमरः॥ भूषणायितं भूषणभूतमित्यर्थः॥ अवेक्ष्य दृष्ट्वा स्वभावशोभा स्वभावेः अंकु
तिमशोभा कांतिः॥ अनुपमां असदृशीमितिमे निरेज्ञा तवतः॥ कुंडलाद्यलंकाराभावेपि स्वभावलप्तवरराजेनिभावः॥ मनुअवनो घनेरहनो लिड्॥ सनेपरे

निरागरागं मुखरागवर्जितं विभूषणं विष्टपभूषणायितम्॥ अमुं पृनावादवेक्ष्य मे निरे स्वभावशोभां नुपमेति लेनवः॥ केन भुजंग
भूतेशविहंगपादिकैः प्रवंदितः सावसरप्रतीक्षयोः॥ ननाम सोयं गुरुपूर्वकान्यतनिहोमहीयामहेगोविंदवने॥ २५॥ श्रीरामः॥ यनः

मेनेमेनाते मेनिरे इति लिड्॥ केन॥ भुजंगेति॥ सावसरप्रतीक्षणोः वंदितुं कराक्षस्मात् अवसरः अवकाशः भविष्यतीति अवसरस्य प्रक्षणं प्रतीक्षणेना
सहितैः॥ सावसरप्रतीक्षणोः॥ भुजंगभूतेशविहंगपादिकैः भुजंगाः सर्पश्च भूतानि प्रेतादिभूतविशेषाः॥ भुजंगभूतानि भुजंगभूतानामीशो त्व
मिनो भुजंगभूतेशौ॥ भुजंगेशः शेषः भूतेशो रुद्रः॥ भूतेशः स्थंडपरशु रितिरुद्रपर्यायमरः॥ विहंगाः पक्षिणः॥ खगे विहंगविहंगमा इत्यमरः॥ पातीति पः
विहंगानां ईशः गरुडः॥ नेपः खगेश्वरः इत्यमरः॥ भुजंगभूतेशौ च विहंगपश्च भुजंगभूतेशविहंगपाः ते आदयो येषां ते तथा॥ योनिकाः तैः
शेषगरुडरुद्रादिभैः प्रवंदितः॥ सम्यक् नमस्कृतः॥ सद्देषादिवंदितः॥ अयं पूर्णप्रज्ञाचार्यः गुरुपूर्वकान् गुरुरस्य अच्युतप्रेक्षणो नामा गुरुः पू
र्वको आद्यो येषां ते गुरुपूर्वकाः॥ तान् अच्युत न्यासिनः॥ ननाम नमस्कृतवान्॥ प्रमहेहेशब्देचेति धातोर्लिड्॥

श्रीराम ११९॥

वरेति। धरिधीः धीरास्थिरा धीर्यस्य सः तथोक्तः उत्तमशिष्यप्राप्त्या स्वास्थ्यं तत्करणा इति भावः। यतीश्वरः यतीनां संन्यासिनां ईश्वरः श्रेष्ठः अ
च्युतप्रेक्षः अस्य पूर्णप्रज्ञाचार्यस्य। वराश्रमाचारविशेषशिक्षणं। वराश्रमस्य यत्याश्रमस्य आचारविशेषः चतुराश्रमविहितशौचाचमनस्ना
नाद्यनुष्ठानविशेष इत्यर्थः आचारविशेषस्य शिक्षणम् उपदेशं विधित्सुः विधातुमिच्छन् सन् अस्य पूर्णप्रज्ञस्य आचरितं आचारं निशाम
यन् पश्यन् सन् स्वयं तस्मात् पूर्णप्रज्ञात् विशेषशिक्षां विशेषेण स्वापेक्षया आधिक्येन शिक्षां अनुष्ठानप्रकारमाप्य ज्ञात्वा अंतरं अंतरेम
नसि एवं विद्यमाने अंतरमवकाशे धिपरिधानं तद्धिया स्वसामर्थ्यविद्धि ज्ञालीय विना बहिरवसरमध्ये अंतरालमन्विच्छेष मनः धिस्मय यत्याश्रम
कर्तव्यानुष्ठानविशेषानभिज्ञत्वं महात्मस्वयं तस्यानुष्ठानविशेषप्रकारं उपदेष्टुकामः सन् स्वयमेव स्वेनाप्य ज्ञाते पूर्णप्रज्ञानुष्ठीयमानाचारवि
शेषं ज्ञात्वा स्वमनसि आश्चर्यं प्राप्येति भावः॥२२॥ एकइति। सः महामतिः महती पूर्णा मतिः प्रज्ञा यस्य सः तथोक्तः संपूर्णप्रज्ञः स्वधिषिः धीः प्रज्ञा शेमु

वराश्रमाचारविशेषशिक्षणं विधित्सुरस्याचरितं निशामयन्। विशेषशिक्षां स्वयमाप्य धीरधीर्यतीश्वरो विस्मयमायता
च्युतः॥२२॥ स नूप्यपीठालयवासिने यदा ननाम नाथाय महामतिर्मुदा। तदा मुनाग्राहि नरप्रवेशिना भुजे भुजेनाशु भुजंगशा
यिना॥२३॥

धीर्मतिरिति मनः। यदा यस्मिन्काले रौप्यपीठालयवासिने रौप्यपीठं च तत् आलयः गृहं च रौप्यपीठालयः गृहं च रौप्यपीठालयः रौप्यपीठ
स्यपुरमिति यावत्। तस्मिन् वासो स्यास्तीति रौप्यपीठालयवासी तस्मै नाथाय स्वामिने अनन्तेश्वराय मुदा संतोषेण ननाम नमस्कृतवा
न् तदा तस्मिन्काले नरप्रवेशिना नरे कस्मिंश्चित् पुरुषे प्रवेशो स्यास्तीति नरप्रवेशी तेन पुरुषप्रविष्टेन अमुना भुजंगशायिना भुजंग
शेषे शेते इति भुजंगशायी तेनानंतेश्वरेण भुजेन तत्तेश्वरहस्तेन भुजे भुजे आशु शीघ्रं अग्राहि गृहीतः गृहतपादानेस्मात्कर्म
णि लुङ्। सनेपदं। अग्राहि अग्राहिषतं अग्राहिषतेति॥२३॥

श्रीराम ११९॥

स्विनादिति। अमुनानरप्रविष्टे न हृदिया। स पूर्णप्रज्ञः तदा हस्तग्रहणात् समयेगृहीहोतेति भावः। अच्युतप्रेक्षसमीपमानीय अच्युतात्म
ने अच्युतेपरमात्मनि आत्मा बुद्धिर्यस्य सः अच्युतात्मा। अच्युतप्रेक्षः तस्मै आत्मा बुद्धिः स्वभावोपायिमरः। प्रददे दत्तः। दुदाञ्दाने इ
त्यतः कर्मणि लिड्। आत्मनेपदं। दददाते ददिरे इति। विवृतासु च तं ज्ञोभ न तत्प्रबुभुत्सुना प्रबोधं हंसातुमिच्छता हृया चिरात् बहुकालं मम
म अच्युतप्रेक्षहृयायत् निषेवणा सेवा अकारि कृता। डुकृञ् करणे इत्यतः कर्मणि लुङ् आत्मनेपदं। अकारि अकारिषाताम् अकारिषतेति।
तत्फलं तस्य फलं मन्निषेवणस्य फलं फलभूतं इमं पूर्णप्रज्ञं ददामीह निधाय प्रददे इत्यन्वयः। डुदाञ् दाने परस्मैपदं। ददामि ददावः द
दामः। मत्प्रसादात् प्राप्तोऽयं पूर्णप्रज्ञात् बममत्तहेतुपदेश्यतीह सोऽप्रददाविति भावः। ५८। अनुग्रहमिति। यः अच्युतप्रेक्षः तं भगवंत
तम् अनुग्रहसादरं अनुग्रहे प्रसादे सादरं अनुग्रहे प्रसादे सिद्धतया भवति तथा इति पूर्ववत् मुदा सेतो पूर्णप्रज्ञं प्रतिगृह्य अंगीकृत्य आत्मना स्वेन नूतन कृतार्थ तां पूर्णकृते
मनोरथो यस्य सः कृतकृत्यः तस्य भावः कृतकृत्यता तां आत्मा स्मरन् अहं इदानीं पूर्णमनोरथं प्राप्तवानु अस्मि इत्यनुसंधानः सन् अ
संगोऽपि प्राकृतजनसंगरहितोऽपि तत्सुसंगवान् तस्मिन् पूर्णप्रज्ञे सुसम्यक् संगः आसक्तिरस्यास्तीति सुसंगवान् अभूत्। तथा कोमेव

चिरात्तत्तत्प्रबुभुत्सुना हृया निषेवणीमेयदकारि तत्फलं। अमुं ददामीह निधाय सोऽमुना तदा प्रणीयप्रददेऽच्युतात्मने। ५८।
अनुग्रहं तं प्रतिगृह्य सादरं मुदात्मनाप्तां कृतकृत्यतां स्मरन्। अभूदसंगोऽपि स तत्सुसंगवान् असंगभूषाननु साधुसंगिता। ५९।

कुतः साधुसंगिता संगवत्त्वं संगरहितः परं असंगभूषा ननु असंगानां संगरहितानां पुरुषाणां भूषा अलंकारो हि। संगः सर्वात्मना त्याज्य
स च कर्तुं न शक्यते सद्भिः सह स कर्तव्यः सन्तः संगस्य भेषजमिति स्मृतेः। अस्तु संगानां संगस्य विषयाणां गहे तु हानात्। सन्तो संगाना
मपि भूषणमेव प्रायशः। ५९। इयासनामिति। स्वस्तटिनी स्वः स्वर्गस्य आ स्वर व्ययं स्वर्गनाकदशमरः। तटिनी नदी। तटिनी हृदिनी धुनिति
नदीपर्यायेमरः। तौ स्वस्तटिनी गंगां प्रियाः सति यातु। मिषति। भूः स्विन्नसि भूरि पूर्वी। भूरि प्राज्यं सुवर्णयोरिति विश्वः। बहुर्थविषयकमि

भविष्यद्विरहाग्निरिति शंकया हि एवानिः विरहाग्निः भविष्यश्चासौ विरहाग्निश्च भविष्यद्विरहाग्निः तस्य शंकया उद्वेगेन दूनधीः दूनासे
ना पिता धीर्मनो यस्य स तथोक्तः संतापितस्तु संतप्तो धूपधूपायितौ दूनश्चेत्यमरः पूर्वप्रश्नेगने मम तद्वियोगो भविष्यतीति भयेन दुः-
रिवतां नवरपा इति भावः हेगुरुच्युतप्रेक्षः ते व्रजंतपीठपुरगतं स्वस्वामिनमेव अनंतेश्वरमस्मरत् स्मृ स्मरणे अस्मात् लुङ् परस्मैपदं ॥७॥
इत इति लङ् स्मरणे सनिक कृपाकरः करुणायाः कृपायाः आकरः कृपासमुद्रः हरिरनंतेश्वरः वं चिम्रूरूषं प्रविश्य तं पूर्वप्रश्नप्रतिअवदत् एक
यहे पूर्वप्रश्ने घुनिम्नगा घोः सुरलोकः सुरलोको घौर्दिवौ द्वे स्त्रियामित्यमरः निम्नगा नदी स्रवंती निम्नगा नदीति नदिपर्यायामेरः घौ निम्नगा घुनिम्ना-
गा स्वर्गनदी गंगा तद्दर्शनं तव स्नानार्थमित्यर्थः इतः अस्मात् इदानीं वर्तमानात् दिवसात् तृतीये दिवसे दिने अस्माकं च त्वाकं अस्माकं अयं अस्माकः ।
अस्माकश्चासौ नियोगकः पद्मानगरश्च अस्मा कर्तव्यकः च एषा करस्तव्यको स्त्रीत्यमरः आव्रजेत् आगमिष्यति व्रजगतो विप्रतो लिङ् परस्मैपदं व्रजेत्
व्रजेतां व्रजेयुः अत एव तस्मात् कारणात् दूरदेशं प्रति नयायः । नगच्छेः इत्यवदिति संबंधः प्राप्य प्रायणे अस्मात् विध्यादौ लिङ् यायात् यायातां यायात इति ॥७॥

पिपासति स्वस्तटिनी मुहुर्मुहुर्नमिष्नु जिज्ञासुर्धिनिभूस्विचे तस्मि । तम स्मरत् स्वामिनमेव दूनधीर्गुरुर्भविष्यद्विरहाग्निशंकया ॥७॥ द्युतस्तृ-
तीयेदिवसे घुनिम्नगा त्वत्तदर्थमस्माकमियोक्तमा व्रजेत् । अथो नथायाद् इति तं नरादेवमप्रविश्य वं चित्कृपाकरो हरिः ॥८॥ नरा इत्यो-
पागत जाह्नवीजलेन जनोऽत्र सस्नौ स्वपूर्वबुद्धिना । जगाम देवत्रानुहुन्नकेवारकेन्द्रानुसवासुदेवादिकपंडितादिकान् ।७२।८॥९

तेष्विति लदाभयानस्पृहे राजय अत्रतया वे उपगतं जाह्नवीजले उपगता प्राप्ता च सा जाह्नवी गंगा च उपगतजाह्नवी गंगा विष्णुपदी जह्नुतनया
सुरनिम्नगेत्यमरः । तस्यां जले सलिले तस्मिन् पूर्वबुद्धिना पूर्वप्रश्नेन स्वं सस्नौ स्नानवान् । ष्णा शौचे इत्यस्मात् लिट् परस्मैपदे सस्नौ सस्नतुः
सस्नुः । सा गौ मात्रमस्माद्दिवसात् परस्मात् द्वादशे संवत्सरे अन्यो वत्सरः संवत्सरे । द्वादश शौच तनु वत्सरस्य द्वादशो वत्सरान्तरं तस्मि-
न् द्वादशे वत्सरे इत्यर्थः । सदा नियमेन प्रतिद्वादशवत्सरमित्यर्थः आव्रजेत् । व्रजंतं पीठं न याव आगच्छेत् । व्रज गतौ विप्रतो लिङ् परस्मैपदं व-
थं भूता तेन नदनुग्रहं कि नो । स्या सावनुग्रहश्च तद्नुग्रहः तस्याकः ।

श्रीराम
११९०॥

अस्यास्तीति तथोक्तेति विग्रहः।तस्य भगवता मध्वाचार्यकृतस्यानुग्रहस्य अंकः चिह्नं द्वादशवत्सरे आगमनरूपं चिह्नं ज्ञायकमिति तिथ्या ननु अस्या
अस्तीति तदनुग्रहो किं नीभागीरथ्याः अत्र द्वादशाब्दवत्सरे आगमनेन मध्ये भगवत्कृतानुग्रहस्य वक्तुमिति भावः।उल्लेख्यस्य स्वक्रियोऽपि समरः॥७॥
गासिद्धि इति।सपूर्णप्रज्ञः चराश्रमं प्राप्य।समासके मास सहिते दिनानां दशके गते अतीते सति मासानंतरं दशसु दिवसेषु च गतेष्वपि दिने
षु अतिक्रांतेषु सत्सु इत्यर्थः।बहुतर्ककर्कशान् बहुविधैस्तर्कैः कर्कशान् परनिराकरणो निर्दयान् अतएव जैत्रान् जयशीलान्।वासुदेवो कृष्णप
डितादिकान्।वासुदेव इति कृष्णः नाम यस्य सः वासुदेवः कृष्णः वासुदेवः।कृष्णश्चासौ पंडितश्च इति वासुदेवः कृष्णपंडितः सएव आदिर्येषां ते वासु
देवकृष्णपंडितादिकाः तान्।सपत्रलंबनं पत्रस्य जयपत्रस्य लंबने स्वीकारः तेन सहितं यथा भवति तथा।जिगाय पराभूतवान्।जित्वा जयपत्रं गृहि
तवानिति भावः।जिजये इत्यस्माद्धातोर्लिट् परस्मैपदं।जिगाय।जिग्यतुः जिग्युरिति॥८॥गुरोर्विजयस्य नतिश्चिह्नं नानेन नरो महात्मना।महान्बहुविषयक
आत्मा मनोऽप्यस्य स तथोक्तः तेनामुना पूर्णप्रज्ञेन इष्टसिद्धि नामको ग्रंथः श्रोतुं तदर्थं श्रोतुं उपचक्रमे उपक्रांतः उपपूर्वात् क्रमु पादविक्षेपे इत्यस्मात् क्रमे

गतेदिनानां दशके समासके वराश्रमं प्राप्य सपत्रलंबनं।जिगाय जैत्रान् बहुतर्ककर्कशान् स वासुदेवं कृष्णपंडितादिकान्॥९॥ गुरोः
स्वशिष्यं चतुरस्य कीर्तिः प्रयोदना श्रोतुमिहोपचक्रमे।अथेष्टसिद्धिं चलजातिबाधिभिः निरादरेणापि महात्मना मुना॥१०॥ छ॥छ॥

पि॥किंभूतेन पस्य चरमे च क्रमात्मनेपदं।सिरोक्तयं भूता इष्टसिद्धिः चलजातिबाधिभिः।चलानि चलेत्तराणि च जातयः आयुत्तराणि च चलजातयः
चलजातिभिः बाधिभिः समुत्पूर्णमिति यावत्।अत्र ते परस्परं व्याहतिर्युक्तमित्यर्थः।कथंभूतेन मुनाऽस्मिन्नुपूयमाणग्रंथे निरादरेणापि
आदररहितेनापि आदराभावे कृत श्रोतुमुपचक्रमे स्वशिष्यं पूर्णप्रज्ञं चतुरं विदग्धं च कीर्तिं कर्तुमिच्छतः गुरोः अच्युतप्रेक्षस्य प्रयोदना
त्प्रेरणात् आदराभावेऽपि गुर्वाज्ञायाः अनुल्लंघ्यत्वात् दूषणयुक्तोऽपि ग्रंथः श्रोतुमारब्ध इति भावः॥१०॥ श्रीरामचंद्राय नमः।श्रीकृष्ण

श्रीराम
११११

तदिति असौ श्लोकः पूर्वप्रज्ञाचार्यैः तदाद्यमध्यस्यांतस्य श्लोकमुपक्रांतस्येह सिद्धिनामकग्रंथस्य आद्ये प्राथमिके पद्ये श्लोके इति इती ति श्लोकसंख्यंषो
डशाद्यम् एकं षोडशसंख्यकानां द्वयं षोडशाद्यं नदेवजालास्वनूपय स्य सत्तथोतस्तो द्वात्रिंशत् संकलितार्थः अवद्यमंडलं अवद्यानां दूषणानां
मंडले समूहे स्यान्मंडलं द्वादशराशिचक्रे चतुर्दिक्चविंबेपकर्तृ बकेचेति रत्नमाला यद्दा वत्तु इति वृत्तवान् प्रकटीकरोतीति यावत् तदा तद्वद्य
मंडले उपरितनवाक्येषु अपास्तं परिपदिहृत्तः इति गुरोः अच्युतप्रेक्षैः मुखाच्च पतित इत्युपसर्गद्वयपूर्वात् व्येरूपं यो वाच्या मतःकर्मणि लोडात्मने
पदं गायत्तां गायेतां गायंतामिति ॥८५॥ भवदिति माया समये मायायाः अज्ञानस्य समये सिध्यति । समयः शपथाचारः कालसि
द्धांतवाच्यका इत्यमरः पटोऽप्यतुरेपिव्रती श्वरे व्रतीनोपनीनामी श्वरे अच्युतप्रेक्षपूर्णप्रज्ञमेममभवत्स्वव अत्र समर्थता भवतः तव प्रब
न्धुः भवि भवद्ब्रवन्तोत्तस्मिन् प्रवक्तरि हे व्याख्यातृ हे व्याख्याने इति यावत् समर्थ इति सामर्थ्यविशिष्टप्रति व्याख्यातुं मम शक्तिर्नास्तीति

तदाद्यमध्यस्यमवद्यमंडलंयवदद्धोडशकद्वयात्मकं उपर्ययास्तं तदिति ब्रुवन् सौ गुरोः मूर्चप्रपिगायतामिति ॥८५॥
भव्यत्र तु समर्थतान मे सकोपमितिं ब्रुवति व्रतीश्वरे अपीह मायासमयेऽपटो नृणां बभूवतेदूषणाशंकयाकुलः ॥८६॥

भावः इत्थं एवंप्रकारेण सकोपं कोपेन सहितं यथा भवति तथा वदति सति नृणां गुरुशिष्यविवादशृण्वतां पुरुषाणां दूषणशंकया आकुल
तस्य शास्त्रस्य दूषणे सद्धासदिति संशयो वुरः संशयस्य संदेहस्यांकुर एव प्रतिबिंबभूव एतावत्कालं निर्दोषित्वेन निश्चितस्य मायिसमय
स्य इदानीं सदोषत्वे शंकांकुरोऽभूदिति भावः ॥८६॥ बुध इति आत्मनः स्व स्य विमुमुक्षुः मोक्षमिच्छन् बुधः विद्वान् एवं निश्चयं अभि
धानं व्याख्यानं दध्यात् कुर्यात् बुधेमः अन्यो बुधः अज्ञानी अवर्णशास्त्र अवर्णविद् ध्यान् एतावत्सर्वोऽस्य साधारणत्वान् अपि यतिविं
शेषान्

श्रीराम
११११

न्तिशयात्। व्याख्यानं श्रवणं गानु कुर्यन्तु उपनिषदमावर्त्तयेदितीति श्रुतेः। शास्त्रव्याख्यानं श्रवणावृत्तिं विना कर्त्तव्यान्तराभावान्नु यतिगृहस्थादिभ्यो ऽप्यतिशयेन व्याख्यानं श्रवणं वा कुर्यन्तु। इति इयं लोकाचोदनात्। लोकानां तत्र तदामितितानां जनानां लोकस्तु भुवने जने इत्यमरः। चोदनात् प्रेरणात् पूर्णधीः पूर्णप्रज्ञाचार्यः मायासमयं मायिशास्त्रप्रवृत्तिं स्म व्याख्यातवान्। अच्युतप्रेक्षणाम मम व्याख्यातुं सामर्थ्यं नास्ति गुरुत्वाद्व्याख्याउक्तवति सति श्रोतृजनः सर्वथा व्याख्यानसमर्थोसि अतो स्माकं त्वमेव मायिशास्त्रव्याख्यानं ब्रूहीति प्रार्थितवन्तः। अतः स्वयं व्याख्यापरस्मैपदलट् स्मातीति। ८७। अखण्डितेति। अज्ञाद्याः। अक्लेन। शास्त्रश्रवणाद्याः संपन्नाः। पूर्वमिव भूतशास्त्राऽस्यार्थः। जनश्चतुराः युक्तिविशेषज्ञानेन विदग्धाः बुभूषवः भवितुमिच्छवः सतः अखण्डितोपन्यसनं अखण्डितं मध्येमध्ये विच्छेदरहितं उपन्यसनं उपन्यासो

बुधोभिधानश्रवणं बुधेन्तरो धृत्वं विदध्याद्धि मुमुक्षुरात्मनः। यतिर्विशेषादिति लोकचोदनप्रवृत्तिर्मायासमयं स्म पूर्णधीः।।
।।८७।। अखण्डितोपन्यसनं विसंशयं ससंप्रदायं प्रवचो दधे तराः।। समागमं श्रोतुममुष्य साग्रहाः जनाः श्रुताढ्याश्चतुरा बुभूषवः।।८८।।

यस्य तथोक्तं तत्। अखण्डितोपन्यसनं धारारूपेण व्याख्येयग्रंथानुवादोपेतमित्यर्थः। विसंशयं विगताः संशयाः यस्मात्तद्विसंशयं परिहारकं दधे तरां दध्यग्निचोदकदूषणरहितं नितरां प्रियस्य तत्। ससंप्रदायं ससंप्रदायः व्याख्यानुपरंपराव्यानप्रकारः तेन सहितं मायिशास्त्राभिज्ञसंमतमिति भावः। अमुष्य पूर्णप्रज्ञाचार्यस्य प्रवचः प्रवचनं मायिशास्त्रव्याख्यानमित्यर्थः। श्रोतुं साग्रहाः आग्रहः आसक्तिः तेन सहिताः व्याख्यानश्रवणे रतिमन्त इत्यर्थः। श्रुताढ्याः सन्तः समागमन्। आगतवन्तः। गमुलगतौ। विधृतो लुङ्परस्मैपदं अगमतुः अगमन्। ८८। गुरोरिति। कदाचनकालस्मीष्विकाले गुरोरच्युतप्रेक्षस्य उपान्ते समीपे भागवतपुराणश्रवणे रतैः निरतैः पैङ्ग्यैः पंचवा षड्वा पंच।।

षाः तैर्द्विजैः लिख्यमानैः लिखिते बहुप्रकारे। बहवः प्रकाराः पाठभेदाः यस्मिन् तत्तथोक्तं तस्मिन्लिखिते चेति भिन्नभिन्नपाठत्वेन लिखिते भागवते पि स प्रभुः पूर्णप्रज्ञाचार्यः दृढनिःसंशयं यथा भवति तथा। एकप्रकारमभ्यधात् एवमवस्थायां श्रीभागवतपुराणव्याख्यानकाले श्रोतृजनैः स्वस्वस्य पृथक् भिन्नपाठत्वेन लिखिते भागवते वाचिते पि पूर्णप्रज्ञः बहुपाठेषु मध्ये एकपाठप्रकारं दृढं अभ्यधात् अयमेव पाठः व्यासाभिहितः अभ्यधा दिति भावः। धातोर्लुङ्परस्मैपदं अधात् अधातां अधुरिति। ॥८६॥ परेति। परप्रकारेष्वपि परे अन्ये च ते प्रकाराश्च परप्रकाराः तेषु पाठांतरे
श्रीराम ॥१२॥ ष्वपि संभवत्सु उपपन्नार्थेषु सत्सु तत्र अस्मिन् भागवदुक्ते पाठे विनिर्णयः अयमेव व्याससोक्तः पाठः नान्य इति निश्चयः कथमिति एवं मुकुंदबोधेन मु कुंदस्य बोधो ज्ञानं यस्य स मुकुंदबोधः अच्युतप्रेक्षस्तेनादीरिते उक्ते सति महाहृत् बहुविषयकं हृत् हृदयं यस्य स महाहृत् पूर्णप्रज्ञः एनं स्वोक्तं प्रकारं पाठप्रकारं भगवत्कृतं भगवता व्यासेन कृतं रचितं स्फुटं सम्यक् सोपपत्तिकमब्रवीत्। ॥८७॥ निगद्यतामिति हे पूर्णप्रज्ञ स्वामिन् त्वं प्रकारे वेदज्ञानासि वद तेन इदमस्माल्लिट्परस्मैपदं चेत् दि जगद्गुरोः जगतां गुरोर्वेदव्यासस्य कृतिः स्थितिः कृतेग्रंथनिर्माणस्य। स्थितिप्रकारे वेदज्ञानासि वद तेन इदमस्माल्लिट्परस्मैपदं चेत्

गुरोरुपांते श्रवणरतैर्द्विजैः सप्रपंचमेव भगवते कदाचन। बहुप्रकारे लिखिते तु वाचिते प्रकारमेवं प्रभुरभ्यधाद्दृढं ॥८६॥
परप्रकारेष्वपि संभवत्सु तत्र विनिर्णयोऽस्मिन्कथमित्युदीरिते। मुकुंदबोधेन महाहृदब्रवीत्प्रकारमेनं भगवत्कृतं स्फुटं ॥८७॥ श्रीराम ॥१२॥
निगद्यतां गद्यमिहैव पंचमे जगद्गुरोर्वेदविकृतिः स्थितिर्यदि। इति ब्रुवाणो यतिसत्तमः स्वयं तदुत्तमार्गेण जगाद भूरिहृत् ॥८८॥

विदधुः वेदिति। तर्हि इहैव भागवते एव पंचमस्कंधे गद्यं अप्रच्छंदोबद्धं वाक्यं गद्यमित्युच्यते। अपादः पादसंतानो गद्यमित्युच्यते बुधैरिति वचनात्। एतादृशं गद्यरूपं वाक्यं निगद्यतां पाठतोर्थतश्च नितरां कथ्यतामिति एवं यतिसत्तमेषु यतीनामुत्तमेषु अच्युतप्रेक्षे ब्रुवाणे सति भूरिहृत् परिपूर्ण हृदयं यस्य सः भूरिहृत् पूर्णप्रज्ञः स्वयं तदुत्तमार्गेण तेन व्यासेन उक्तः व्यासोक्तप्रकारश्च तदुक्तमार्गस्तेन जगाद पाठं पठित्वा व्यवदत् गद्य वाचोयुक्तिः लोकस्मिन् लौकिकमर्थं जनैः। गद्यतां गद्यतां गद्यतामिति। गद धातोर्लिट्परस्मैपदं जगाद जगदतुः जगदुः इति ॥८८॥ ८९॥ ९॥

म०।। अशेषेति तदा सघपठ्याकाले तदाज्ञियानस्यगुरो माज्ञ नियोगे नाशेषशिष्यैः अशेषाश्च ते शिष्याश्च अशेषशिष्यास्तैश्च तैरपि परीक्षणायपूर्णपि ज०।
ज्ञानत्वात् कृपुस्तके षु अस्तिन वेत्ति परीक्षार्थं विश्वासार्थमित्यर्थः समस्तपुस्तकं समस्तं च तत्पुस्तकं च समस्तपुस्तकं समुदायैकवच्च नं पंपमस्त्वं
घात्म समस्तकस्य समुदायः एष्टिपदष्टद्रक्षुदर्शनां कमये। दिमतः व मपिलङन्स नेपर्द एषेक्षि क्षिप नरोक्षितेति सः पूर्वप्रिज्ञास्याचार्यः तत्राशेषपु
स्तव मध्ये एकत्र मन्नुमपाठस्य एकेक पुस्तकज्ञातगणपाठानुसारेणवदन्निति भावः तावत्तदा एक पुस्तकगणपाठानुसारेण पठ्याकाले ध्यायनिकामेअ
ध्यायानां निकायः पुञ्जास्यानिकायः पुञ्जराशीत्यमरः। पंचम स्कंधाध्याय समूहमभ्यधात् पाठ तोर्थत्त श्च अवदत् पुनः अश्वयं हि र्षवा।।५२।।अत्रेति
हे अत्रजयशील नेहया अत्र जन्म नियदेवपुरायणादिके नपठितं नाधीतं जनेकश्चे भातिप्रति भाति भादीप्तौ विश्रुतो लट्‌ पुरस्मैपदं भातिभातेः भां
ति। इत्येवममुनगुरुणा अच्युतप्रेक्षेपउक्ते सतिअमितबुद्धिः अमिता बुद्धिः प्रज्ञायस्यसः तथोक्तः पूर्वप्रिज्ञाचार्यः अहं इदं सर्वं जन्मसु पूर्वविपिअतीतानि यजन्मा

अशेषशिष्यै श्च तदाज्ञयापि परीक्षणायैसि समस्तपुस्तके। सतत्रहंतैकत्तमेनतावदध्यायनिकायमभ्यधात्।।५२।। अत्रजन्मनि
नयत्प्रठितं नैत्रभातिकथमितिरमुनोक्ते। पूर्वजन्मसु वेदपुरेदं सवमिति अमितबुद्धिरुवाचौ।। [illegible] स्थितं मजनूः।।५३।। श्रीरामायनमः।

मित्यपूर्वजन्मातितेषु पूर्वजन्मसु वेदपुराज्ञातनानवृत्तिप्रसिद्धइदं सवाच्च। विदज्ञाने इत्यस्मात् लट्‌ परस्मैपदं वेद विदः किन्नेति। वेपुरेत्यश्चयानमु
दानि पायोलङिति सूत्रेणातीता र्थेनिर्देशः ३ रघो धृतावृत्तौ। प्रायुरेर्नरलिगेरथो धृतेनिश्चयनात्।।५३।। श्रीगुरुभ्योनमः। श्रीवेदव्यासायनमः।

इतीति। इति पूर्वोक्तप्रकारेण बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः विश्वेषां सर्वेषां जनानां आश्चर्यभूतास्चित्तस्य हृदयस्य। चित्तं तु चेतो हृदयमित्यमरः। प्रवृ
त्तिः प्रकृष्टया अतिशयित्वा वर्तिः पदिणामः ज्ञानमित्यर्थः। चित्तप्रवृत्तिः विश्वाश्चर्यभूताश्च सा चित्तप्रवृत्तिश्च विश्वाश्चर्यचित्तप्रवृत्तिः। बहवः विधाः
प्रकाराः यस्याः सा बहुविधा नानाविधविषयिणीति भावः। विधा विधोत्थप्रकारेष्वमरः। बहुविधा विश्वाश्चर्यप्रवृत्तिर्यस्य सः तथोक्तः तस्य आस्यपूर्णप्रज्ञा
चार्यस्य कीर्तिर्यशः नूत्ननापिनवीनापि जगति लोके वितति व्याप्तिं आययुः। अयगतावित्यस्मात् लिङ् परस्मैपदं आयत् आयतुः आयुः आयत्त आयतं आत्तेमा नो
मध्वकीर्तिः सर्वत्र व्याप्तेति भावः। कथं भूता कीर्तिः भास्करी। भास्करस्य सूर्यस्य भास्करी सूर्यसंबंधिनी प्रभेव दीप्तिरिव। क्षपिततततमस्का क्षपितं निरस्तं
ततं व्याप्तं सर्वजगत्कं च तमित्यर्थः। तमः अज्ञानलक्षणौघकारो यया सा तथोक्ते पुनः कथंभूता चंद्रिकेव कौमुदकीव सुजनकुमुदवृंदानंददा। सुजनाः कुमुदानि वृंदानंद दाविवसुजनकुमु
श्रीराम ।१२१।
इति बहुविधविश्वाश्चर्यचित्तप्रवृत्तेर्जगति वितति माययन्नूत्ना व्याप्यस कीर्त्तिः। क्षपिततततमस्का भास्करी वप्रभा लं सुजनकुमुदवृंदानंद
दा चंद्रिकेवा ।५७। ।इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यनारायणपंडिताचार्य विरचिते श्रीमध्वविजये आनंदांके चतुर्दशः सर्गः ।१४।
श्रीराम ।१२१।
दानि इंदीवरे च नीले स्मिन् सितेकुमुदकैरवे इत्यमरः तेषां वृंदः समूहः तस्य। मंदं हर्षं ददातीति सुजनकुमुदवृंदानंददा। अनेन सूर्यदृष्टांतेन अज्ञाननाशकत्वं तस्य
अनिष्टपरिहारकत्वं चंद्रदृष्टांतेन आनंददातृत्वात् इष्टप्रापकत्वं चोक्तं भवति तेन च महागुरुत्वं चोक्तं भवति पूर्णप्रज्ञाचार्यस्येति ज्ञेयं। वृत्तं मालिनी। ननमयययुतेयं
मालिनी भोगिलोकैरिति। तल्लक्षणात्। ।इति श्री मध्वविजयटीकायां छलारि नरसिंहाचार्यपौत्र शिष्येण शेषाचार्येण विरचितायां मंदोपकारिण्यां चतुर्दशः सर्गः
समाप्तः। श्रीमध्वांतर्गत श्रीकृष्णार्पणमस्तु। श्रीमध्वविजयस्यास्य प्रीतये श्री रामध्वयेः। चतुर्दशे लिखितः सर्गः श्रीगुरुभ्यो नमः। श्रीवेदव्यासाय नमः।

Sri Sumadhyavijaya 21/3